सर्ग ११ 1

# एकादशः सर्गः।

[1] पूर्वसर्गे स्वयंवरवर्णनपुरस्सरं देव्याः [2] श्रीवाग्देवतायाः वर्णनमभिधाय राजवर्णनं च संक्षेपतः कृत्वा कविर्जम्बूद्वीपान्तरस्थान् राज्ञो विवर्णयिषुरेकादशं सर्गमारभते।

तां देवतामिव मुखेन्दुवसत्प्रसादा-
मक्ष्णा रसादनिमिषेण निभालयन्तीम्।
लाभाय चेतसि धृतस्य वरस्य भीम-
भूमीन्द्रजा तदनु राजसभां बभाज॥१॥

[1] तां देवताम् [इति]। तदनु राज्ञां स्वयंवरगमनानन्तरं भीमभूमीन्द्रजा चेतसि धृतस्य वरस्य लाभाय तां राजसभां बभाज। किं कुर्वतीं सभाम्? रसादनुरागात् [2] अनिमिषेण अक्ष्णा निभालयन्तीम्। पुनः किं भूतां सभाम्? मुखेन्दौ वसन् [3] प्रसादो यस्यास्तां तथा। प्रसन्नाभिमुखामित्यर्थः। उत्प्रेक्षते - देवतामिव। [4] उपमा वा देवताऽपि मुखे [5] वसत्प्रसादो भवति। प्रसादोऽनुग्रहः वरस्याऽभिलाषितस्य लाभाय भज्यते च। भक्तिरूपाऽस्ति। तथा निर्निमेषेण चक्षुषा पश्यति। [6] वसन्ततिलका॥१॥

तस्मिन्मिलत्प्रवयवभिच्चिषु तद्विभूषा-
रत्नेषु च प्रतिफलन्निजदेहदम्भात्।

1 P₁ वदंदऽ ॐ नमः श्रीगणेशाय॥ 2 P₂ om. देव्याः — 1 P₁ तां देवताम्।
2 B P₁ अनिमेषेण 3 P₁ प्रमोदो 4 P₂ om. उपमा वा 5 B भक्ष्यते
6 P₂ om. वसन्ततिलका॥१॥

सर्ग ११ 2

दृष्ट्या परं न हृदयेन न केवलं तैः
सर्वात्मनैव सुतनौ युवभिर्ममज्जे ॥२॥

(151a) [1]तुष्टिर्[मिल्लेति] | तैर्युवभिस्तस्यां सुतनौ न परं न[2] केवलं दृष्ट्या ममज्जे[3] न केवलं हृदयेन कृत्वा तस्यां युवभिर्मग्नम् | किन्तु सर्वात्मनैव सकलैरपि तत्र ममज्जे | कस्मात् ? | तस्या निर्मला ये अवयवाः कपोलहस्तपादादयस्त एव भित्तयस्तासु प्रतिफलन्तो ये निजदेहास्तेषां दम्भात्[4] व्याजात् | [तथा] तस्याः विभूषारत्नेषु[5] ये प्रतिबिम्बिताः स्वशरीरव्याजाच्च सकलैरपि तैर्मग्नम्[6] ॥२॥

द्यामन्तरा वसुमतीमपि गाधिजन्मा
यद्यन्यमेव निरमास्यत नाकलोकम्
चारुः स ता दृगभविष्यदभूद्विमाने-
स्तादृक् तदभ्रमथलोकितुमागताम् ॥३॥

[1]द्यामन्तरेति | यदि गाधिजन्मा विश्वामित्रो द्यां स्वर्गं वसुमतीं च अन्तरा मध्ये अन्यमेव नाकलोकं निरमास्यत | ततः स नूतनो देवलोको यादृक् चारुरभविष्यत | अवलोकितुमागतानां विमानैस्तदभ्रमाकाशं तादृक् शोभमानमभूत् | अन्तरान्तरेण युक्ते[2](पा II.iii.4) इति[3] द्वितीया | अन्तराशब्दो मध्यभाधेयप्रधानभाचष्टे ॥३॥

1 P1 तष्टि ॥ 2 P1 om. न 3 P2 ववर्ध तथा 4 B दम्भात् 5 B om. च
6 P2 निर्मग्नम् ॥२॥
1 B1 द्याम ॥ 2 P2 om. अन्तरा° ... °माचष्टे 3 P1 om. इति — ॥३॥

कुर्वद्भिरात्मभवसौरभसम्प्रदानं
भूपालचक्रचलचामरमारुतौघम् ।
आलोकनाय दिवि सञ्चरतां सुराणां
तत्रार्चनाविधिरभूदधिवासधूपैः ॥४॥

[1]कुर्वद्भिः [इति] । तत्र स्वयंवरेऽधि[वा]सधूपैर्दिवि /वा
[2]आलोकनाय संचरतां सुराणाम् अर्चनाविधिरभूत् । देवाः किल यत्राऽऽगच्छन्ति तत्र पूज्यन्ते । किं कुर्वद्भिः धूपैः ? । भूपालचक्रस्य चलतां चामराणां ये /ला मारुतास्तेषाम् ओघं समूहम् आत्मभवस्य सौरभस्य सं[प्र]दानं दानपात्रं /रु कुर्वद्भिः । कर्मणा यमभिप्रैति स सम्प्रदानम् (पा. I.IV.32) । मारुतं सुरभीकुर्वद्भिः ॥४॥

तत्राऽवनीन्द्रचयचन्दनचन्द्रलेप-
नेपथ्यगन्धवह[1]गन्धवहप्रवाहम् ।
आलीभिरापतदनङ्गशरानुसारी
संरुध्य सौरभमगाहत भृङ्गवर्गः ॥५॥

[2]तत्र [इति] । [3]भृङ्गवर्गः सौरभमगाहत तत्र । किं कृत्वा[4] ? । अवनीन्द्राणां राज्ञां चयस्य चन्दनस्य चन्द्रस्य[5] कर्पूरस्य च यो लेपो अङ्गरागस्तन्मयं नेपथ्यं तस्य गन्धः परिमलस्तं[6] वहतीत्येवंविधस्य गन्धवहस्य[7] वायोः प्रवाहं संरुध्य । गन्धमय[8]गन्धवहेति पाठान्तरम् । [काभिः ?] आलीभिः प[9]ङ्क्तिभिः । किं भूतो भृङ्गवर्गः ? । आपतन्तो ये अनङ्ग-शरास्ताननुसरतीत्येवंशीलः कन्दर्पबाणानुकारी । शिराभिसारीति पाठान्तरम् ॥५॥

1 P. कुर्वद्भिः । 2 P. अव० 3 P. सम्प्रभि० — ॥४॥ 1 P2 [illegible] ०मय० 2 P. तत्र; P2 तत्राऽवनीन्द्रेति । 3 P2 तत्र here 4 P2 om. किं कृत्वा ? । 5 P2 om. चन्द्रस्य 6 P2 adds च 7 B P. ०वाहस्य 8 B P. ०मय० 9 P. पङ्क्तिषु अर्थे स्रोतें (P2 4) om. starts upto X.137 — ॥५॥

सर्ग ११ 4

उत्तुङ्गमङ्गलमृदङ्गनिनादभङ्गी
सर्वानुवादविधिबोधितसाधुमेधाः ।
सौधस्रजः प्लुतपताकतयाभिनिन्यु-
र्मध्ये जनेषु निजताण्डवपण्डितत्वम् ॥६॥ /न/स्य

[1]उत्तुङ्ग[ेति] अहम् एवं मन्ये [2]सौधानां धवलगृहाणां स्रजः पङ्क्तयः प्लुता[3] पताका यासां तासां[4] भावस्तत्ता तया प्लुतपताकतया जनस्य मध्ये निजस्यात्मनस्ताण्डवे नृत्यविषये पण्डितत्वं प्रवीणत्वम् अभिनिन्युः दर्शयन्ति स्म । किं भूताः[5]? उत्तुङ्गो यो मङ्गलमृदङ्गनिनादस्तस्य भङ्गी विच्छित्तिः यस्याः[6] [तस्या यः] सर्वानुवादविधिः प्रतिशब्दरूपस्तेन बोधिता साध्वी मेधा यासां तास्तथा । यः किल नृत्यति, स मृदङ्गनादं मनसो मध्ये [अनुबुध्य] तत्तालानुसारेण नृत्यति । पताका लक्षणं हस्तकं प्लुतं कुरुते ॥६॥

संभाषणां[1] भगवती सदृशीं विधाय
वाग्देवता विनयबन्धुरकन्धरायाः ।
ऊ
अधे चतुर्दशजगज्जननाननस्था
तत्राश्रिता सदसि दक्षिणपक्षमस्याः ॥७॥

संभाषणाम्[इति] । सा भगवती वाग्देवता तत्र सदसि अस्या भैम्या [दक्षिण] पक्षं श्रिता सती सदृशीं दमयन्त्या उचितां वत्से! विदर्भे[न्द्र]-पुत्रीत्यादिकां संभाषणां विधाय ऊचे उवाच । संभाषणमिति पाठः । किंभूतायाः? [विनयेन] बन्धुरा नम्रा कन्धरा यस्यास्तस्यास्तथा । किंभूता? चतुर्दश

1B उत्तुङ्ग। |2B मध्ये 3P2 om. विसर्गः 4P2 om. तासां 5B किंभूताः? 6P2 om. यस्याः — ॥६॥ 1P2 Text संभाषणं

सर्ग ११ 5

जगतो[2] या जनता। तस्या नम[स्या][3] नमस्करणीया। ग्रामजनबन्धुसहायेभ्यस्तल्[4] (पा. IV. i. 43) ॥७॥

अभ्यागमन्मरुभुजामिह कोटिरेषां
येषां पृथक्कथनमब्दशतानि पाति।
अस्यां वृणीष्व मनसा परिभाव्य कञ्चि-
द्यं चित्तवृत्तिरनुधावति तावकीना ॥८॥

अभ्यागमत् [इति]। इह स्वयंवरे मरुभुजां कोटिरेषा अभ्यागमत्। येषां[1] पृथक्भूतं कथनम् अब्दानां वर्षाणां शतानि अतिपतनीयेयं शीलम् अशक्यम्[2]। अस्यां कोटिसङ्ख्यायां मनसा परिभाव्य कञ्चिद्देवं वृणीष्व हे दमयन्ति। यं तावकीना चित्तवृत्तिरनुधावति। उत्तरवाक्यगतो (15(b)) यच्छब्दः पूर्वत्र तच्छब्दोपादानं नापेक्षते[3] ॥८॥

ऋषां त्वदीक्षणरसादनिमेषतैषां
स्वाभाविकानिमिषतामिलिता यथाऽभूत्।
आस्ये तथैव तव तन्वधरोपभोगे–
मुग्धे! विधावमृतपानमपि द्विधाऽस्तु ॥९॥

[ऋषामिति]। ऋषां देवानां यथा तवेक्षणे[1] रसादेषा अनिमेषता स्वाभाविक्या अनिमिषतया मिलिता अभूत्[2]। एतेन अनिमिषताया द्विधाभाव आक्षेपेण लब्धः। स्त्रियाः पुंवदित्यादिना (पा. VI. iii. 34) प्राप्तस्य पुंव-

2B जगतो 3P2 om. नमस्या 4P2 om. ग्राम° ---- तल् ॥७॥

1B ऋषां 2P2 om. अशक्यम् 3B wrong numberings fr. here –॥८॥

1B °क्षणे 2P2 om. अभूत् ------°निमिषता मिलिता

सर्ग २१ 6

द्भावस्य, न कोपधायाः (पा० ६।३।३७) इति, वृद्धिनिमित्तस्य च तद्धितस्याऽरक्तविकारे (पा० ६।३।३९) इति च प्रतिषेधे प्राप्ते, पुंवत्कर्मधारयजातीयदेशीयेषु (पा० ६।३।४२) इति प्रसवः। अथवा वक्ष्यमाणं द्विधेत्यत्राऽपि सम्बध्यते। तदयमर्थः — यथा स्वाभाविकी निम्नगता मिलिता सती द्विधाऽभूत्। तथैवैषां तवास्ये द्विधौ अधरामृतस्य उपभोगौ कृत्वा ननु[3] हे मुग्धे! विधौ अमृतपानमपि द्विधा अस्तु ॥९॥

---

एषां गिरेः सकलरत्नफलस्तरुः स
प्राग्दुग्धभूमिसुरभेः खलु पञ्चशाखः।
मुक्ताफलं फलनसान्वयनाम तन्व-
न्नाभाति बिन्दुभिरिव, स्फुरितः[1] पयोधेः ॥१०॥

---

एषां [गिरेः इति] खलु निश्चितं सः[2] सकलरत्नफलस्तरुः कल्पवृक्षः एषां देवानां गिरेः मेरोः पञ्चशाखो हस्तः। किंभूतस्य? प्राक् पूर्वं दुग्धा भूमिरेव सुरभिर्येन [सः][3] तस्य तथा। स वृक्षो मुक्ताफलं तन्वन् सन् पयोधेः[4] बिन्दुभिरिव, स्फुरित आभाति। किंभूतम्? फलनेन[5] सान्वयं सार्थकं[6] नाम यस्य तत्तथा। मुक्ता मौक्तिकान्येव फलं मुक्ताफलमित्यन्वयः। नामपर्यायो मुक्ताफलस्य निरवयवत्वात्। वृक्षोक्तानां सान्वयता। तथा पुराणे[7] शैलैश्च[8] श्रूयते राजन्। पृथुर्दुग्धा वसुन्धरा। ८ ९ ३। मेरुः किल दोग्धा[9] तेन तस्य हस्तो दुग्ध[10]बिन्दुभिः स्फुरित इव। अत एव पयोधिपदम्। कल्पवृक्षोऽपि मन्दारपारिजातादिभेदेन पञ्चधा अस्ति। अपरोऽपि वृक्षश्चतसृषु दिक्षु ऊर्ध्वायां च दिशि [सः] शाखत्वात् पञ्चशाखः। अथ वा स प्रसिद्धः सकलरत्नफल-

---

3 P₂ ननु — ॥९॥ 1 P₂ text स्फुरितः 2 P₂ om. सः 3 P₁ om. सः 4 P₂ पयोधिः 5 B फलनेन 6 B सार्थकं 7 B पुराणैः 8 B शैलै॰ 9 P₂ add. विसर्गः 10 B add. विसर्गः

सर्ग ११ 7

स्तबकाभाति। स्वल्पितत्युत्प्रेक्षते। एषां गिरः पञ्चशरस्य इस्तौ[11] इत्येकमेव वाक्यम् ॥१०॥

वक्त्रेन्दुसंनिधिनिमीलितदलारविन्द-
द्वन्द्वभ्रमक्षममथाञ्जलिमात्ममौलौ।
कृत्वापराधभयचञ्चलमीक्षमाणा
सान्यत्र गन्तुममरैः कृपयान्वमानि ॥५४॥

वक्त्रेन्दु [संनिधी]ति। सा अमरैः कृपया अन्यत्र गन्तुम् अन्वमानि अनुमता। किं कुर्वाणा? अथ[1] आत्मनो मौलौ अञ्जलिं कृत्वा अपराधः अनङ्गीकारस्तस्माद्भयं तेन चञ्चलं चकितं यथा [तथा] ईक्षमाणा[2]। किंभूतमञ्जलिम्? वक्त्रेन्दोः संनिधौ निमीलितदलं संकुचितं[3] यदरविन्दद्वन्द्वं तस्य भ्रमो भ्रान्तिस्तस्य क्षमम् ॥५४॥

तं तद्विरागमुदितं शिबिकाधरस्थाः
साक्षाद्विदुः स्म न मनागपि यानधुर्याः।
आसन्ननायकचिरन्तनमुख्यानुमेय-
भैमीविरक्तिचरितानुमया नु[1] जग्मुः ॥५५॥

तं तद्[2] [इति]। यानस्य धुर्या वाहकपुरुषास्तं तस्या विरागमुदितं साक्षात्प्रत्यक्षं मनागपि न विदुः स्म। यतः शिबिकाया विमानस्य अधरभागस्थाः[3] [अधरभागे] स्थिताः नु पुनर्जग्मुः। अन्यत्र

11 P2 इव ॥१०॥

1 B अथः 2 B ईक्षमाणः 3 B संकुचितं; P2 कुञ्चितं —— ॥५४॥

1 P2 text नुजग्मु 2 P2 तं तद्विरागमिति 3 P2 om. अधरभागस्थाः ——

सर्ग ११ 8

सञ्चारिताः । कथा ? । आसन्नो यो नायकोऽयं लोचयमानस्तस्याऽनङ्गी- करणेन विषण्णं विषादगतं यन्मुखं तेनाऽनुमेय[म्] अनुमानेन ग्रेयं / तै यद्भैम्या दमयन्त्या विरक्तं चरितं वैराग्यं तदेवाऽनु[मा अनुमानं] प्रमाणं तेन जज्ञुः । जज्ञुरिति पाठान्तरम् (पा. IV. IV. 77) । यद्यपि प्रत्यक्षेण नयस्तथाप्यनुमानेन / सु जज्ञुः । चुरौ यङ्लुकौ ॥१२॥

---

रक्षः सु रक्षणमवेक्ष्य निजं निवृत्तो
विद्याधरेष्वधरतां वपुषैव भैम्याः ।
गन्धर्वसंसदि न गन्धमपि स्वरस्य
तस्या विमृश्य विमुखोऽजनि यानिवर्गः ॥१३॥

---

रक्षः [सु रक्षणमिति] । यानिनां वाहकानां वर्गो रक्षःसु विषये निजं रक्ष[ण]मवेक्ष्याऽऽत्मरक्षामपेक्ष्य निवृत्तः । रक्षसां हि मनुष्यो भक्ष्यः । अन्ये तु निजं रक्षसां सम्बन्धि रक्षणमवेक्ष्य निवृत्तः । मन्त्रौ रक्षोघ्नैस्तत्र पुरे रक्षा बद्धा आसीत् । ततो रक्षसां प्रवेशाभावाद्द्विपयोगमेव प्राति, चिन्तैव न कृतेत्यर्थः । विद्याधरेषु भैम्याः सकाशात् अधरतां वपुषैव अवेक्ष्य (52a) / निवृत्तः । तथा गन्धर्वाणां संसदि तस्या भैम्याः स्वरस्य गन्धमपि लेशमात्र- मपि न विमृश्य यानिवर्गो विमुखो [जनि] जातः ॥१३॥

---

दीनेषु सत्स्वपि कृताफलविचरक्षै-
र्यक्षैरदर्शि न मुखं त्रपयैव भैम्याः ।

---

4 B विलोक्य°; 5 P2 om. विषादगतं; 6 P2 om. अनुमानेन; 7 P2 तत; 8 P2 om. दमयन्त्या; 9 B चिरं; 10 P2 om. यद्यपि ---- यङ्लुकौ; 11 B यज्ञः; —— ॥१२॥

1 P2 text °वीक्ष्य 2 P2 om. द्विप° ---- कृतेत्यर्थः; 3 P2 om. जातः —— ॥१३॥

सर्ग ११ 9

ते जानते स्म सुरशाखिपतिव्रतां किं
तां कल्पवीरुधमधिक्षिति नावतीर्णाम्[1] ॥१४॥

हीनेषु [सत्स्विति] यशैस्तस्या अग्रे मुखं त्रपया। एव न अदर्शि। किंभूतैः? हीनेषु लोकेषु सत्स्वपि कृता अफला। वित्तस्य रक्षा यैस्तैस्तथा। ते यशा[2]स्तां किं कल्पवीरुधं कल्पलताम् अधिक्षिति अवतीर्णां[3] [न] जानते स्म। वीरुधं[4] विशिनष्टि — किंभूताम्?। सुरशाखिनः कल्पवृक्षस्य पत्युर्व्रतं /शा यस्यास्तां तथा पतिव्रतां पत्नीम् ॥१४॥

जन्यास्ततः फणभृतामधिपं सुरौघा-
न्माञ्जिष्ठमञ्जिमविगाहिपदोष्ठलक्ष्मीम्।
तां मानसं निखिलवारिचयान्नवीना
हंसावलीमिव घना गमयां बभूवुः[1] ॥१५॥ /वुः

जन्या [इति]। ततः सुरौघात् देवेभ्यः सकाशात् जन्याः जनी वधूस्तस्यां वाहु[5]कास्तां फणभृतामधिपं वासुकिं गमयां बभुवुः। किंभूताम्?। माञ्जिष्ठस्य[2] रक्तस्य मञ्जिमानं विगाहते इत्येवं शीला पदयोरोष्ठयोश्च लक्ष्मीः शोभा यस्यास्तां तथा। रक्तचरणा रक्तोष्ठी च। यथा[3] नवीना घना हंसावलीं निखिलवारिचयात् जलाशयेभ्यो मानसं गमयन्ति। किंभूताम्?। रक्तचरणां रक्तचञ्चुपुटां च। गतिबुद्धिप्रत्यवसानार्थशब्दकर्मा[4]कर्मकाणामणि कर्ता स णौ (पा° I.IV.52) इति कर्मसंज्ञा। तत्र [हि]ती (पा° IV.IV.76) त्यधिकारे संज्ञायां जन्या (पा° IV.IV.82) इति यत्। अन्यत्र तु जामातृपर्यस्येऽपि जन्य-शब्दो यथा जन्ययात्रा। ॥१५॥

1 $P_2$ text 15 2 B. ते के 3 $P_2$. °तीर्णं 4 B. विरुद्धं ———— ॥१४॥

1 B. 14; $P_2$ text. 16 . 2 B. °रागरक्तस्य 3 B. तथा 4 $P_2$ om. °कर्मा° ———— ॥१५॥

यस्या विभोः[1] सकलवाङ्मयविस्तरोऽय-
माख्यायते परिणतिर्मुनिभिः पुनः सा ।
उद्गत्वरामृतकरार्धपरार्ध्यभालं
बालामभावत समासततप्रगल्भा ॥१६॥

यस्या [विभोरिति] । यस्याः विभोर्वाग्देव्याः[2] परिणतिः[3] परिणामोऽयं सकलोऽपि वाङ्मयविस्तरो[4] मुनिभिराख्यायते । सा देवी पुनरपि बालामभावत । किंभूताम् ? । उद्गत्वरम् उद्यन् योऽमृतकरस्तस्यार्धं खण्डं तद्वत् परार्ध्यं शोभमानं[5] भालं यस्यास्तां तथा । किंभूता देवी ? । [समा][6] सततप्रगल्भा ॥१६॥

आश्लेषलग्नगिरिजाकुचकुङ्कुमेन
यः पट्टसूत्रपरिरम्भणशोणशोभः ।
यज्ञोपवीतपदवीं भजते स शंभोः
सेवासु वासुकिरयं प्रथितः सितश्रीः ॥१७॥

आश्लेषलग्नेति । सोऽयं वासुकिर्यः शम्भोर्यज्ञोपवीतपदवीं भजते । किंभूतः ? । सेवासु प्रसितः[1] तत्परः । तथा सिता शुभ्रा श्रीर्यस्य । उपवीतं[2] हि शुभ्रं भवति । तथा आश्लेषेण आलिङ्गनेन लग्नं यत् गिरिजायाः कुचयोः कुङ्कुमं तेन पट्टसूत्रस्य परिरम्भणवत् शोणा रक्ता शोभा यस्य[3] स तथा । उपवीतेऽपि प्रवराणां स्थाने रक्तपट्टसूत्रवेष्टनं भवति ॥१७॥

1 P2 text °रस्खलित° 2 B वाग्देव्याः 3 P2 om. परिणतिः 4 B P1 P2 °वितस्तारो edd. °विस्तरो 5 P2 शोभनं 6 B P1 P2 om. समा° edd. add. समा° ———— ॥१६॥

1 P2 प्रथितः 2 B P1 P2 °वीतं हि भवति 3 B यस्याः ———— ॥१७॥

पाणौ फणी भजति कङ्कणभूयमैशे
सोऽयं मनोहरमणीरमणीयमुच्चैः ।
कोटीरबन्धनधनुर्गुणयोगपट्ट-
व्यापारपारगममुं भज भूतभर्तुः ॥९०॥

पाणौ [इति] । सोऽयं फणी [ऐशे][1] ईशस्य सम्बन्धिनि पाणौ कङ्कणभूयं भजति । किं भूतम्? । उच्चैरतिशयेन मनोहरा ये मणयस्तै[2] रमणीयम् । मणिशब्दस्य ह्रस्वस्य दीर्घत्वमिति समासे दीर्घः । मणीशब्दो [वा] मणिरिति[3] वा भिन्नं पदं फणि[4]विशेषणत्वम् । अमुं भज । किं भूतम्? । भूतभर्तुः कोटीरं मुकुटं तस्य बन्धनं तथा धनुषो गुणो मौर्वी तथा योगपट्टं चैतेषु व्यापारेषु पारगं इत्यन्वयम् ॥९०॥

धृत्वैकया रसनयाऽमृतमीश्वरेन्दो-
रन्यया व्यदधरस्य रसं द्विजिह्वः ।
आस्वादयन्युगपदेष परं विशेषं
निर्णेतुमेतदुभयस्य यदि क्षमः स्यात् ॥९१॥

धृत्वै [कयेति] । एषः[1] वासुकिः एकया रसनया ईश्वरेन्दोरमृतं धृत्वा तथा अन्यया द्वितीययाऽपि जिह्वया व्यदधरस्य रसं धृत्वा युगपदास्वादयन् [सन्] एतस्योभयस्य अमृताधर[2]रसरूपद्वयस्य परम् उत्कृष्टं विशेषं[3] भेदं निर्णेतुं यदि क्षमः स्यादथवा । स[4] परं केवलं यदि क्षमस्तदायमेव/चलो द्विजिह्वः ॥९१॥

1 P₂ om. एषो 2 B. स्तेन 3 B. मणि° 4 B फल° ——— ॥९०॥

1 P₂ add. अयं 2 P₂ om. अधर° 3 B. भेदं विशेषं 4 P₂ om. स ——— ॥९१॥

आशीविषेण रदनच्छददंशदान-
मेतेन ते पुनरनर्थतया न गण्यम् ।
बाधां विधातुमधरे हि न तावकीने
पीयूषसारघटिते घटतेऽस्य शक्तिः ॥२०॥

[1]आशी[2]विषेणेति । तत्त्वया पुनरेतेन आशीविषे[3](ऽ)[4](ण) रदनच्छदे ओष्ठे दंशदानं दन्तक्षतम् अनर्थतया विघ्नभयेन न गण्यम् । कृत्यानां कर्त्तरि वे (पा· II. iii 71) ति षष्ठी । हि यस्मात् तावकीनेऽधरेऽस्याऽऽशीविषस्य बाधां विधातुं शक्तिर्न[4] घटते । किंभूते । पीयूषसारेण घटिते ॥२०॥

तद्विस्फुरत्फणविलोकनभूतभीतेः
कम्पं च वीक्ष्य पुलकं च तवोऽनु तस्याः ।
सञ्जात(स्फा)सात्त्विकविकारधियः स्वभृत्या-
न्भृत्याश्च येधदुरगाधिपतिर्विलक्षः ॥२१॥

[1]तद्विस्फुरदिति । उरगाधिपतिः स्वभृत्यान् सर्पान् भृत्या-[2]
[3]श्चयेघत् । विलक्षः सन् । किंभूतान् ? । तस्याः कम्पं पुलकं च वीक्ष्य तवोऽनु संजाता सात्त्विकविकारस्य स्तम्भस्वेदरोमाञ्चादे[4]र्धीर्येषां तान् तथा । किंभूतायाः । तस्य वासुके[5]र्विस्फुरन्तो ये फणास्तद्विलोकनेन भूता भीतिर्यस्यास्तथा । भूतभीतेरिति कर्मधारये पञ्चम्यन्तम् । वा दमयन्त्याः [6]फणविलोकनेन भूता भीतिर्यस्यास्तस्याः दर्शनात् कम्पो रोमाञ्चश्च जातः ।

1 B आशीः 2 P₁ °विशेषेणेति 3 P₂ °विशेषेण 4 B बधा ——॥२०॥

1 P₂ यदि 2 P₂ om. भृत्यान् 3 B निषेधात् 4 P₂ °देर्धी° 5 B तस्याः 6 P₂ om. – विलोकनेन ———— दर्शनात् ~~7 P₂ सात्त्विका:~~

सर्ग ११ 13

सर्पैरिति ज्ञातम्। यतस्या अस्मत्स्वामिनं दृष्ट्वा रागेण कम्पस्तथा रोमाञ्चो जातः। ततो नृत्यन्तोऽमी वासुकिना निवारिताः ॥२१॥

वद्धर्शिभिः स्ववरणे फणिभिर्निराशै—
निःश्वस्य तत्क्षणमपि सूक्ष्ममनात्मनीनम्।
यत्तान् प्रयातुमनसोऽपि विमानवाहा
हा हा प्रतीपपवनाशकुनाञ्च जग्मुः ॥२२॥

[तद्धर्शिभिरिति] फणिभिर्वासुकिव्यतिरिक्तैस्तद्धर्शिभिस्तं वासुकिम् अनङ्गीकृतं पश्यद्भिस्त एव स्वस्य वरणे निराशैः सद्भिर्निःश्वस्य तत्क्षणमपि अनात्मनीनम् आत्मनो न हितं यथात् सूक्ष्मं कृतं यत्तान् नागान् प्रति प्रयातुमनसोऽपि सन्तो विमानवाहाः हा हा इति खेदे। प्रतीपपवन एवाऽशकुनं तस्माञ्च जग्मुः। निःश्वासेन तेषां सन्मुखो वायुर्बभूव स एवाऽपशकुनः। आत्मविश्वजन भोगोत्तरपदात्स्व (पा. V. i. 9) इति ख। तस्यायनेयीनी (पा. VIII. i. 2) त्याङिना। ईन् ॥२२॥

ह्रीसंकुचत्फणगणा उरगप्रधाना—
तां राजसङ्घमनयन्त विमानवाहाः।
संध्यानमङ्गलकुलात्क्रमतो द्वितीय[1]
कल्हारमिन्दुकिरणा इव हासभासम् ॥२३॥

[ह्रीसंकुचदिति]। विमानवाहास्ताम् उरगप्रधानादनन्तरं राज्ञां सङ्घम् अनयन्त। किं विशिष्टात् ? । ह्रिया संकुचन् फणानां गणो

7 वारिताः ॥२१॥ 1B निहितं 2B सूक्ष्मं 3B प्रयातु°— ॥२२॥
1P₂ text °द्वितीय 2 P₂ om विसर्ग 3B————

यस्त्वत्तस्मात्। यथा। इन्दुकिरणा हासस्य[3] विकासस्य[4] भास कमलाद् हित्वीय अपनीय कल्हारं कुमुदं नयन्ति। द्वितीयमिति [वा] पाठः। एतच्चोपमेयेऽपि योज्यम्। विनीयेति त्वपि। किं भूतान्? संध्यायां नमत् दलकुलं यैस्[5] तस्मात्तथा ॥२३॥

देव्याऽभ्यधायि भव भीरु। धृतावधाना
भूमीभुजस्त्यजत भीमभुवो निरीक्षाम्।
आलोकितामपि पुनः पिबतां दृशैता-
मिच्छापि[1] गच्छति न वत्सरकोटिभिर्वः ॥२४॥

देव्येति[2]। देव्या अभ्यधायि उक्तम्। हे भीरु[3]। त्वं धृतावधाना भव। हे भूमीभुजः। हे राजानः। यूयं भीमभुवो निरीक्षां त्यजत[4]। यत एताम् आलोकितामपि दृशा पुनः पुनः पिबतां पश्यतां सतां[5] वो युष्माकम् इच्छा वत्सराणां कोटिभिरपि न[6] गच्छति। वचनश्रवणपरायणा भवतेत्यर्थः। भजतेति[7] पुस्तकान्तरपाठोऽशुद्धः ॥२४॥

लोकेशकेशवशिवानपि यश्चकार
शृङ्गाररसान्तरभृशान्तरशान्तभावान्।
पञ्चेन्द्रियाणि जगतामिषुपञ्चकेन
स क्षोभयन्वितनुतां वितनुर्मुदं वः ॥२५॥

लोकेशकेशवेति। स वितनुः कामो [वो] मुदं वितनुताम्। किं कुर्वन्? इषुपञ्चकेन जगतां पञ्च इन्द्रियाणि क्षोभयन्। यो लोकेशो

3 B हारस्य 4 B° [भि]येति पाठः। 5 यत्र यस्मात् — ॥२३॥ 1 P₂ text विगच्छति.
2 P₂ देव्याभ्यधायीति। 3 P₂ भीम 4 B P₂ भजत 5 सतां 6 P₂ न विगच्छति 7 P₂° भतो°

ब्रह्मा केशवः शिवश्च एतानपि शृङ्गारेण आन्तरो मिश्रितः भृशम् आन्तरो मध्यवर्ती शान्तभावः शान्तरसो येषां तान् तथा एवं विधान् चकार ॥२५॥

पुष्पेषुणा ध्रुवममूनिषुवर्षजप्त
　　हुङ्कारमन्त्रजलभस्मितशान्तशक्तीन्
शृङ्गारसर्गरसिकद्व्यणुकोदरि । त्वं
　　द्वीपाधिपान्नयनयोर्नय गोचरत्वम् ॥२६॥

पुष्पेषुणा[इति] । हे शृङ्गार[र]सस्य सर्गे सृष्टौ रसिकं यत्तद् द्व्यणुकं[1] परमाणुद्वयसंयोगस्तद्वदुदरं यस्याः [तस्याः]संबोधनम् । हे कृशोदरि । त्वं द्वीपानाम्[2] अमून् अधिपान् नयनयोर्गोचरत्वं नय । किं भूतान् ? । ध्रुवं पुष्पेषुणा इषुवर्षैः जप्तो[3] हुङ्कार एव मन्त्रस्तस्य बलेन भस्मिता शान्ते रूप[शा]मस्य शक्तिर्येषां तां(53 a)स्तथा । जपिवमिभ्यां वा (१) इति जपेर्निष्ठायाम् इडागमो[4]भावः । वैशेषिकाणां द्व्यणुकादिसृष्टिः[5] ॥२६॥

स्वादूदके जलनिधौ सवनेन सार्धं
　　भव्या भवन्तु तव वारिविगाहलीलाः[1] ।
द्वीपस्य तं पतिममुं भज पुष्करस्य
　　निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि ॥२७॥

स्वादूदके इति । हे भैमि । तव स्वादु मृष्टमुदकं यत्र तत्र जलनिधौ सवनेन[2] राज्ञा सार्धं भव्या वारिविगाहलीला[3] जलकेलयो भवन्तु । हे निस्तन्द्रं विकसितं यत् पुष्करं कमलं तस्य तिरस्करणक्षमे

1 P2 द्व्यणुक[के]द्वयसंयोग° 2 B अमून द्वीपानां 3 B जप्तियों 4 P2 om. विसर्गः 5 P2 add विसर्गः — ॥२६॥ 1 P2 text °विहार° 2 B भवनेन 3 B विगाहन°

अक्षिणी यस्यास्तस्याः सम्बोधनम् ।[त्वं तममुं पुष्करस्य द्वीपस्य पतिं भज।] पुष्करद्वीपं नाम सर्वद्वीपप्रान्त[4]स्तस्मादारभ्य पुराणोक्तक्रमेण।ऽभ्यन्तराभ्यन्तरद्वीपा[नि] समुद्रं राजानं देवतां वृक्षं च ज[म्बू]द्वीपं च[5] सर्वाभ्यन्तरं यावत् वर्णयिष्यन् आत्मने भुवनकोशप्रावीण्यं दर्शयति ॥२७॥

सावर्तभावभवदङ्गुतनाभिकूपे।
स्वभौममेतदुपवर्तनमात्मनैव ।
स्वाराज्यमर्जयसि न श्रियमेतदीया-
मेतद्गृहे परिगृहाण शचीविलासम् ॥२८॥

[1]सावर्तेति । इ सह आवर्तेन लक्षणविशेषेण वर्तते सावर्त-स्तस्य भावस्तेन भवद[2]ङ्गुतोऽङ्गुतयुक्तो नाभिकूपो यस्यास्तस्याः सम्बोधनम् । त्वम् एतदीयां श्रियमेव च स्वाराज्यं [स्वर्गस्य राज्यं] नार्जयसि ।अपि त्वं तत एतस्य गृहे शच्या इन्द्राण्या विलासं परिगृहाण ।यत एतस्य मान[3]सोत्तरसंसवर्षं वर्तते । विभिन्नमहातलात्तत्कं श्रृङ्गसंक्षितवर्षद्वयविभागविशिष्टम् । उपवर्तनं राष्ट्रदेशो उपवर्तन्तेऽस्मिन् उपवर्तनम् । उपावर्तनमिति कोऽन्यः ।आत्मनैव भौमं भूमिसम्बन्धि स्वः स्वर्गरूपम् । त[4]दुक्तम् — वर्षद्वयं तु मैत्रेय । भौमः स्वर्गोऽयमुत्तमः। सर्वत्र सुखदः कान्तो जरारोगविवर्जितः (Vi.P. II.4.84cd-85ab) इत्यादि । एतानि किल द्वीपानि दिव्यभोगत्वात् स्वर्गस्तत्र राज्यं स्वा[5]राज्यम् ॥२८॥

देवः स्वयं वसति तत्र किल स्वयंभु
र्न्यग्रोधमण्डलतले हिमशीतले यः।

4 B P₂ प्रान्ते 5 P₂ om. च — ॥२७॥ 1 P₂ सावर्तभावेति । 2 P₂ om अङ्गुतो 3 P₂ मानसो... ....मिति कोऽन्यः but add . उपवर्तनं स्थानं नगरं देशः ।4 P₂ om. तदुक्तम् ... ... विवर्जितः इत्यादि । 5 B °राष्ट्रम् । —— ॥२८॥

स त्वां विलोक्य निजशिल्पमनन्यकल्पं[1]
सर्वेषु कारुषु करोतु करेण दर्पम् ॥२९॥

देव[2] [इति।] तत्र किल स्वयंभूर्देवो ब्रह्मा यः स्वयं वसति। क्व? न्यग्रोध एव मण्डपस्तस्य तले। किंभूते? हिमवच्छीततले। स ब्रह्मा [त्वां] निजस्य शिल्पम् आत्मनिष्पादितम् अनन्यकल्पाम्[3] अनन्य- (न
सदृशीं विलोक्य स्वेन करेण [हस्तेन] सर्वेषु कारुषु शिल्पिषु मध्ये दर्पं करोतु ॥२९॥

न्यग्रोधनादिव दिवः पतदातपादे-
र्न्यग्रोधमात्मभरधारमिवावरोहैः।
त्वं तस्य पाकिफलनीलदलद्युतिभ्यां /६
द्वीपस्य पश्य शिखिपत्रजमातपत्रम् ॥३०॥

न्यग्रोध[नादिति]। हे भैमि! त्वं [तं] न्यग्रोधं तस्य द्वीपस्य उपरि शिखिनो मयूरास्तेषां पत्रेभ्यः पिच्छेभ्यो जातम्[1] आतपत्रं श्रीकरी-[2] संज्ञं पश्य। काभ्याम्? पाकीनि पक्वानि फलानि तेषां द्युतिस्तथा नीलानां दलानां[3] द्युतिस्ताभ्यां कृत्वा। मयूरपिच्छेषु नीला रक्ताश्चन्द्रका[4] भवन्ति। किंभूतम्? दिव आकाशात् पतत् आतपशीतवृष्ट्यादेर्न्यक् नीचैर्रोधनादिव न्यग्रोधसंज्ञम्। तथा अवरोहैरधःप्ररोहैरात्मभरधारमिव[5] आत्मनो भरस्य भर्तारमिव ॥३०॥

1 B text कल्पं 2 B देवः स्वयमिति। 3 B om. अनन्यकल्पाम् —॥२९॥
1 B om. जातम् 2 B श्रीकर 3 B om. दलानां 4 B चन्द्रिका
5 B om. आत्मभरधारमिव —॥३०॥

न श्वेततां चरतु वा भुवनेषु राज-
हंसस्य न प्रियतमा कथमस्य कीर्तिः।
चित्रं तु यद्विशदिमाद्वयमादिशन्ती
क्षीरं च नाम्बु च मिथः पृथगातनोति ॥३१॥

न श्वेत[तामिति]।अस्य राज्ञो हंसस्य राजा[1] चासौ हंसे-
श्चेति कर्मधारयो वा राजप्रधानस्य प्रियतमा कीर्तिः कथं न श्वेततां [चरतु][2] श्वेतीभवतु। कथं वा भुवनेषु [न] चरतु। या किल हंसाङ्गना सा श्वेता भुवनेषु उदकेषु[च] चरति। तु पुनस्तच्चित्रं यद् विशदिम्नो धवलत्वस्य।द्वयम्[3] उभयम् आदिशन्ती कुर्वन्ती सती[4] क्षीरं चाम्बु च मिथः पृथक् [न] आतनोति।सर्वं श्वेतत्वात् सदृशं जातम्।या किल हंसाङ्गना सा क्षीरं [5]नीरं च पृथक्कुरुते ॥३१॥

शूरेऽपि सूरिपरिषत्प्रथमार्चितेऽपि
शृङ्गारभङ्गिमधुरेऽपि कलाधरेऽपि। /क
तस्मिन्नवद्यमियमाप तदेव नाम
यत्कोमलं किल न तस्य नलेति नाम ॥३२॥

शूरे[ऽपीति]।सा इयं दमयन्ती तस्मिन्नाम अहो[1] तदे-
(153b)व अवद्यं दोषम् आप।अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु (पा° III.1.101)ति निपातः।यत्किल तस्य कोमलं नल इति नाम न आसीत्। किंभूते?।शूरेऽपि।तथा सूरीणां[2] विदुषां परिषदि सभायां प्रथमम् अर्चितेऽपि।तथा शृङ्गारस्य भङ्गिभिर्मधुरेऽपि।तथा कलानां गीतादीनाम्[3] आकरेऽपि॥
॥३२॥

1 P om. राजा....धारयो वा राज° 2 P om. चरतु 3 P अयम् 4 P om. सती
5 P om. नीरं — ॥३१॥ 1 B आह 2 B तथाऽरीणां 3 P गीतानाम् — ॥३२॥

भ्रूवल्लिवेल्लितमथाकृतिभङ्गमेषा[1] लिङ्गं चकार तदनादरणस्य विज्ञा।
राज्ञोऽपि तस्य तदलाभजयत्नापवह्निश्चिह्नीबभूव मलिनच्छविभूमधूमः॥ /ता ॥३३॥

भ्रूवल्लि[इति]। एषा अथ[2] आकृतेर्भङ्गं तस्या[अनादरणस्य]
लिङ्गं चकार। किंभूतम्? भ्रूवल्ल्या[3] वेल्लितं ज्ञापितम् अथवा भ्रूलता-
वेल्लितं भ्रुवः[4] प्रेक्षितं[5] चालनमेव। आकृतेराकारस्य भङ्गं लिङ्गम्
अकरोत्। [यतो] विज्ञा विशेषज्ञा। वेल्लितमयाकृतिभङ्गमित्येकपद-
पाठे मयट् प्रत्ययः। तस्य राज्ञोऽपि[6] मलिनच्छवेः यो भूमा बाहुल्यं स एव
धूमः तस्याऽलाभाज्जातो यस्तापः एव वह्निस्तस्य चिह्नीबभूव। यत्र
धूमस्[7]तत्र वह्निरित्यन्वयव्यतिरेकित्वात्॥३३॥

राजान्तराभिमुखमिन्दुमुखीमथैनां जन्या जना हृदयवेदितयैव निन्युः।
अन्यानपेक्षितविधौ न खलु प्रधानवाचां भवत्यवसरः सति भव्यभृत्ये॥३४॥

राजान्तरेति]। अथ जन्या वध्वा वोढारो जना
एनाम् इन्दुमुखीं राजान्तरस्याऽन्यस्याऽभिमुखं निन्युः। कया? हृदयं
विन्दत्येवंशीला[1] तया एव। खलु यतो भव्यभृत्ये सति प्रधानस्य /या
स्वामिनो वाचामवसरो [न] भवति। किंविशिष्टे भृत्ये? अन्यानपेक्षितो[2]ऽ-
न्येषाम् अपेक्षारहितो[3] विधिः कार्यं यस्मिन् तथा। निरपेक्षमेव
कार्याणि करोति॥३४॥

1 P2 text °भङ्गा° 2 B अर्थ 3 P2 add. वल्ल्या 4 P2 om. भ्रुवः प्रेक्षितम्
5 B चालना° 6 P2 वलिन° 7 B वह्नि° — ॥३३॥

1 P2 °शील तया एव 2 P2 अन्यापे° 3 B °रहितविधेः — ॥३४॥

सर्ग ११ 20

ऊचे पुनर्भगवती नृपमन्यमस्यै निर्दिश्य दृश्यतमताविमताश्विनेयम् ।
आलोक्यतामयमये ! कुलशीलशाली शालीनतानतमुदस्य निजास्यबिम्बम् ॥ ॥३५॥

ऊचे [पुनरिति] । भगवती अस्यै अन्यं नृपं निर्दिश्य पुनरपि ऊचे । किंभूतम् ? । दृश्यतमतयाऽतिसौन्दर्येणाऽवमतौ आश्विनेयौ[1] येन तं तथा । अये ! हे भैमि[2] ! अयं कुलशीलशाली राजा आलोक्यताम् । किं कृत्वा ? । शालीनतया सलज्जत्वेन नतं निजास्यबिम्बम् उदस्य । शालीन-कौपीने अधृष्टाकार्ययोरि (पा० V । १ । २०) ति खञ् । आयनेयीनी[3] (पा० VII । १ । २) इत्यादिना ईनि सति[4] निपातः ॥३५॥

एतत्पुरःपठदपश्रमबन्दिवृन्दवाग्डम्बरैरनवकाशतरेऽम्बरेऽस्मिन् ।
उत्पत्तुमस्ति पदमेव न मत्पदानामर्थोऽपि नार्थपुनरुक्तिषु पातुकानाम् ॥३६॥

एतत् [पुर इति] । एतस्य पुरः पठन्तोऽपश्रमा[1] ये बन्दिनस्तेषां वृन्दस्य वाग्डम्बरैरनवकाशतरे[2] व्याप्तेऽस्मिन्नम्बरे मम पदानां वचसाम् उत्पन्नं पदमेव स्थानं[3] कमेव नाऽस्ति । शब्दो ह्यम्बरगुणः । तथा मम वचसाम् उत्पत्तुम् अर्थोऽपि[4] नाऽस्ति । किंभूतानाम् [अर्थानाम्] ? । पुनरुक्तिषु पातुकानाम् । सर्वेऽप्यर्था बन्दिभिरेव प्रथममुक्ताः ॥३६॥

जन्यत्र हव्य इति विश्रुतनाम्नि शाकद्वीपप्रशासिनि सुधीषु सुधीभवन्त्या ।
एतद्भुजाबिरुदबन्दिजयाऽनयाऽपि किं शाकि राजनि गिराऽजनि नान्तरं ते ॥३७॥

1 R अश्विने 2 R om. हे भैमि ! 3 R आयनेयीनीत्यादिना 4 R om. सति — ॥३५॥

1 R व्यपत्रपा 2 B ०काशान्तरे 3 R स्थानमेव 4 R om. अपि — ॥३६॥

नन्वत्र [इति]। पुष्करद्वीपं सप्तमं तस्मादर्वाक् षष्ठं शाकद्वीपम्। ननु अत्र[1] राजनि हव्ये[2] इति विश्रुतनाम्नि[3] तथा शाकद्वीप-प्रशासिनि विषयेऽनयाऽपि बन्दिनां गिरा वर्णनया किं ते तवान्तरं मनो [रागि] नाऽजनि[4]? किं [भू]तया? एतस्य भुजयोर्बिरुदावलीं वदन्तः स्तुवन्ति[5] इत्येवंशीला ये तेभ्यो जाता[6] तया। तथा सुधीषु विद्वत्सु प्रीणनेन सुधी-भवन्त्या ॥३७॥

---

शाकः शुकच्छदसमच्छविपत्रमालभारी हरिष्यति तरुस्तव तत्र चित्तम्।
यत्पल्लवौघपरिरम्भविजृम्भितेन[1] ख्याता जगत्सु हरितो हरितः स्फुरन्ति ॥३८॥

---

शाकः [शुकेति]। हे तन्वि![2] तत्र शाकस्तरुस्तव चित्तं हरिष्यति। किंभूतः? शुकानां छदाः पक्षाणि तत्समच्छवीनि हरितानि[3] पत्राणि तेषां मालां बिभर्तीत्येवंशीलः। इष्टकेषीकामालानां चिततूल-भारीष्विव (पा० ६।३।६५) इति। मालाशब्दाकारस्य[4] ह्रस्वः। यस्य शाकस्य पल्लवौघस्य परिरम्भस्य विजृम्भितं[5] प्रसरस्तेन जगत्सु ख्याता[6] प्रसिद्धा हरितो दिशो हरित इति नाम्ना स्फुरन्ति ॥३८॥

---

स्पर्शेन तत्र किल तत्तरुपत्रजन्मा यन्मारुतः कमपि संमदमादधाति।
कौतूहलं तदनुभूय विधेहि भूयः श्रद्धां पराशरपुराणकथान्तरेऽपि ॥३९॥

---

स्पर्शेन [इति]। तत्र द्वीपे किल इति श्रूयते। तस्य तरोः पत्रजन्मा मारुतः स्पर्शेन यत्कमपि संमदम् आदधाति तत् कौतूहलम्

---

1 B तत्र 2 B हव्ये 3 B विश्रुतानाम्नी 4 B व्यजनि 5 R स्तुवन्ती 6 R जातया —॥३७॥ 1 R ºवत्र विलम्भितेन 2 R om. हे तन्वि! 3 ॥ R पत्राणि हरितानि 4 R ºशब्दस्याकारस्य 5 B विजृम्भित 6 B ख्यातो

सर्ग २२ 22

अनुभूय भूयोऽपि पराशरमुनेः पुराणं विष्णुपुराणं तस्य कथान्तरेऽपि अन्यस्यामपि कथायां श्रद्धां विधेहि मानयस्व। केचित्तु यत्तु छन्दानुगुण्यात् यन्मारुत (15म व) इति पठित्वा यच्छब्दः संमदविशेषणं तच्छब्दस्य च कौतुहलस्य लिङ्गं गृहीतमिति व्याचक्षते ॥३९॥

क्षीरार्णवस्तव करक्षरुचिच्छटानामन्वेतु तत्र विकरायितमायताक्षि!।
वेलावनीवनलतिप्रतिबिम्बचुम्बाकिर्मीरितोर्मिनिचयश्चारिमचापलाभ्याम् ॥४०॥

क्षीरार्णव इति] । हे आयताक्षि! हे भैमि! तत्र क्षीरार्णवस्तव करक्षरुचीनां छटाः प्रसरास्तासां विकरायितं विलसितम् अन्वेतु । काभ्याम्?। वेलायाम् अवनीषु या वनानां लतिस्तस्याः प्रतिबिम्बचुम्बेन किर्मीरिताः। प्रतिबिम्बचुम्बीति पाठे प्रतिबिम्बचुम्बिना एव किर्मीरिता मिश्रिता ये ऊर्मीणां चयास्तेषां यश्चारिमा चापल्यं[च] ताभ्याम् [अन्वेतु] गच्छतु। अध्येतु इति पाठान्तरम् । उद्गात्रादिपाठात्, [अनु] प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् (पा० V।१।१२९) अन्यत्र तु ब्राह्मणादिपाठात ~~[illegible]~~ ष्यञपि ॥४०॥

बालातपैः कृतकगौरिकितां कृतां त्वित्तत्रोदयाचलशिलाः परिशीलयन्तु।
त्वद्विभ्रमभ्रमणजश्रमवारिधारिपादाङ्गुलीगलिततया नखलाक्षयाऽपि ॥४१॥

बाला[तपैरिति]। तत्रोदयाचलस्य शिला द्विर्द्विवारं कृतकां गौरिकितां धातुत्वं परिशीलयन्तु अनुभवन्तु। कैः? बालातपैः

1।2 मोदस्व 2।। 2 यत्तच्छ० 3।। च्छब्देन च — ॥३९॥
1।2 ०थ्य ०चुम्बि० 2।2 हे आयताक्षि! ~~क्षी~~ तव 3।2 छटा मरीचनानां
5 क्षी चपलत्वं 6।2 ०म अन्वेतु 7 B अन्यपत्र 8।।2 यणि ॥४०॥ 1 B गौरि०

कृत्वा द्वितीया तस्याना लाक्षयाऽपि अलक्तकेन च कृताम् । किंभूतया? तव विभ्रमेण लीलया चङ्क्रमणं तस्माज्जातं श्रमवारि धारयन्ति याः पादाङ्गुल्यस्ताभ्यो गलितया च्युतया ॥४१॥

---

नृणां करम्बितमुदामुदयन्मृगाङ्कशङ्कां सृजत्वनघजङ्घि ! परिभ्रमन्त्याः । तत्रोदयाद्रिशिखरे तव दृश्यमास्यं कश्मीरसंभवसमास्चनाभिरामम् ॥४२॥

---

नृणां [करम्बितेति] । हे अनघजङ्घि[1] ! तत्रोदयाद्रिशिखरे परिभ्रमन्त्याः तव दृश्यम् आस्यं नृणाम् उदयतो मृगाङ्कस्य शङ्कां सृजतु । किंभूतम्? । कश्मीरसम्भवं कुङ्कुमं तस्य समास्चनया[2] अभिरामं रक्तम् । किंभूतानां नृणाम्? । करम्बिता[3] [तारकादित्वादितच् (पा० V ii.36)] अङ्कुरादिक्रमेण करम्बिता अङ्कुरादिभूता पुनर्[मुत्] हर्षो येषां तेषां तथा ॥४२॥

---

एतेन ते विरहपावकमेत्य तावत् कामं स्वनाम कलितान्वयमन्वभावि । अङ्गीकरोषि यदि तं तव नन्दनाद्यैर्लब्धान्वयं स्वमपि तन्वयमातनोतु ॥४३॥

---

एतेन [ते इति] । एतेन राज्ञा ते तव विरहपावकमेत्य प्राप्य तावत्कामं निश्चितं स्वं हव्य इति नाम कलितो धृतो[1]ऽन्वयोऽर्थो यस्य तत्तथा सार्थकमन्वभावि अनुभूतम् । हूयते इति ~~हव्य~~: हव्यः । यदि तं विरहातुरं प्रक्रान्तं त्वम् अङ्गीकरोषि, ननु [तदा अयं] स्वमपि[2] स्वमात्मानमपि तव नन्दनाद्यैः पुत्रपौत्रादिभिर्लब्धोऽन्वयो येन तं तथाविधम् आतनोतु[3] वंशवृद्धिर्भवतु । एतेन इति तमिति[4] अयमिति समीपतरप्रक्रान्तप्रत्ययवाचिभिर्नवीकृतत्वं[5] दर्शितम् । पूर्वत्र यदीति वचनात् तहीति[6] लोपे –

---

2 D वारयन्ति – ॥४१॥ 1 D ०जङ्घे 2 B ०रचनया 3 A, D कलम्बित० ॥४२॥
1 D, A० धृतो 2 D, A स्वमपि 3 B आतनोति 4 D नमिति 5 B ०प्रत्ययक० 6 B नित्यपे० — ॥४३॥

क्षितम्। यदि त्वदिति पाठे [तु] निराकाङ्क्षैव प्रतीतिः॥४३॥

लक्ष्मीलतासमवलम्ब[1]भुजद्रुमेऽपि वाग्देवतायतनमञ्जुमुखाम्बुजेऽपि।
सोऽमुत्र दूषणमजीगणदेकमेव नार्थी बभूव मघवा यदमुष्य देवः॥४४॥

लक्ष्मी[लतेति]। सो[2] अमुत्र राजनि एकमेव दूषणम् अजीगणत् यत्[3] अमुष्य मघवा देवः इन्द्रो न अर्थी बभूव[4]। नलस्यैव किलेन्द्रोऽर्थी अभूत्। किं विशिष्टे[5] अस्मिन्?। लक्ष्मीरेव लता तस्याः समवलम्बभूतौ भुजावेव द्रुमौ यस्य तस्मिंस्तथा। अवलम्ब्येति पाठे अवलम्ब्यौ अवलम्बनीयौ भुजौ यस्येति व्याख्या। वाग्देवताया[6] आयतनं मञ्जु मुखाम्बुजं यस्य तत्र तथाविधेऽपि॥४४॥

लक्ष्मीविलासवसतेः सुमनःसु मुख्यादस्माद्विकृष्य भुवि लब्धगुणप्रसिद्धिम्।
स्थानान्तरं तदनु निन्युरिमां विमानवाहाः पुनः सुरभितामिव गन्धवाहाः॥ ॥४५॥

लक्ष्मी[विलासेति]। विमानवाहाः इमाम् अस्मात् राज्ञो विकृष्य[1] तदनु पुनरपि स्थानान्तरं[2] निन्युः। किं भूतात्?। लक्ष्मीविलासानां वसतिरूपात् लक्ष्म्याः क्रीडागृहाद्वा। तथा सुमनःसु विद्वत्सु मध्ये मुख्यात्। किं भूताम्?। भुवि लब्धा गुणानां सौन्दर्यादीनां[3] प्रसिद्धिर्यया तां तथा। यथा गन्धवाहा वायवः[4] सुरभितां स्थानान्तरं नयन्ति। कुतः?। सुमनःसु पुष्पेषु मुख्यात् (154 b) कामात्[5] सकाशात्। तथा यत्र सौरभ्यं तत्र लक्ष्मीर्वसति।[6] लक्ष्मीवसतेः सुम[नः]सु मुख्यात्

1 P2 °लब्ध° 2 B मा 3 P2 न here 4 B add. इति 5 B विशिष्टे 6 B देवतयोरा°
–॥०४॥ 1 P2 विक्षिप्य 2 P2 om. °न्तरं निन्युः… गुणानां 3 B सौर्या° 4 P2
वयवः 5 P2 om. कामात् 6 P2 om. लक्ष्मी°… पद्मादिति वा। ——

पद्मादीति वा। सुरभिताऽपि गुणेषु मध्ये [7]लब्धप्रसिद्धिः। तथा च गुणा [8]रूपरसगन्धस्पर्शेत्यादि (I.6.1) वैशेषिकसूत्रम्। गुणप्रसिद्धेरित्यपि पाठः ॥४५॥

---

भूयस्ततो निखिलवाङ्मयदेवता सा हेमोपमेयतनुभासमभाषतैनाम्।
एनं स्वबाहुबहुवारनिवारितारिं चित्ते कुरुष्व कुरुविन्दसकान्तिदन्ति! ॥४६॥

---

भूय[1]:[इति]। ततः सा निखिलवाङ्मयदेवता एनां भूयोऽभाषत। किंभूताम्?। हेम्ना उपमेया तनोर्भा यस्यास्तां तथा। हे कुरुविन्देन पद्मरागमणिना समानकान्तयो दन्ता यस्यास्त[2]स्याः सम्बोधनम्। केचित् [तु] कुरुविन्दं [हि[3]ङ्गुलं] पद्मं वा तत्समानदन्ति! एनं राजानं स्वबाहुभ्यां बहून् वारान् निवारिता अरयो येन तं तथाविधं चित्ते कुरुष्व ॥४६॥

---

(दयितं)
द्वीपस्य पश्य धुतिमन्तमेनं क्रौञ्चस्य चञ्चलदृगञ्चलविभ्रमेण।
यन्मण्डले सकलमण्डलसन्निवेशः पाण्डुश्चकास्ति दधिमण्डलयो(प)योधिपूरः ॥४७॥

---

द्वीप[1]स्ये[ति]। हे भैमि! [त्वमेनं] क्रौञ्चस्य द्वीपस्य अधिपतिं दयितं प्रियं धुतिमन्तं नाम[2] पश्य। क्रौञ्चस्येति स्वस्वामिभावसम्बन्धे षष्ठी। केन?। चञ्चलो यो दृशोरञ्चलस्तस्य विभ्रमेण। यस्य मण्डले दध्नो[3] मण्ड[4][illegible]स्य यः पयोधिस्तस्य पूरश्चकास्ति। पाण्डुस्तथा। सकलो मण्डलो वर्तुलाकारः सन्निवेशो यस्य स तथा। दधिसमुद्रवेष्टितः। स किल इत्यपि क्वचित्पाठः ॥४७॥

---

7 P2 लब्धि° 8 P2 add. गुण° 9 B °विशेष° — ॥४५॥

1 P2 भूयस्तत इति। 2 P2 om. तस्याः 3 P2 पद्मं हिङ्गुलं — ॥४६॥

1 P2 द्वीपस्य पश्येति। 2 P2 नाम पश्य 3 B दधना 4 P2 मण्डलस्य — ॥४७॥

तत्राऽद्रिरस्ति भवदङ्घ्रिविहारयाची क्रौञ्चः स्फुरिष्यति गुणानिव यस्त्वदीयान्
हंसावलीकलकलप्रतिनादवाग्भिः स्कन्देषुवृन्दविवरैर्विवरीतुकामः ॥
॥४८॥

तत्राद्रिरिति ॥ तत्र द्वीपे[1] क्रौञ्चो नामाऽद्रिरस्ति । किंभूतः[2] ? । भवत्या अङ्घ्रिविहारं याचते इत्येवंशीलः । धारीति पाठे धारयिष्यतीति । यस्त्वदीयान् गुणान् स्कन्दस्य कार्तिकेयस्य इषुवृन्दानां विवरैश्छिद्रैर्विवरीतुकाम[3] इव स्फुरिष्यति वर्धिष्यतीव । किंभूतैः ? । हंसावलीनां कलकलस्य प्रतिनाद एव[5] वचो येषु तैस्तथा । हंसास्तत्र छिद्रेषु[6] सञ्चरन्तः शब्दायन्ते । ततश्च किल त्वद्गुणान् रन्ध्राणि गृणन्ति ॥४८॥

वैदर्भि ! दर्भदलपूजनयाऽपि यस्य गर्भे जनः पुनरुदेति न जातु मातुः ।
तस्यार्चनां रचय तत्र मृगाङ्कमौलेस्तन्मात्रदैवतजनाभिजनः स देशः ॥४९॥

वैदर्भीति ॥ हे वैदर्भि ! तत्र[1] तस्य मृगाङ्कमौलेः श्रीमहादेवस्यार्चनं रचय । यस्य दर्भस्य दलानि तैः पूजनयाऽपि कृतया[2] जनो लोको मातुर्गर्भे पुनर्नोदेति । जातु कदाचित[3] । यतः स देशो द्वीपो दैवतानि[4] पुंसि वा[5] (अमर० I.i.9) त्याम्नानेऽपि पुंस्यप्रयोगात् । वे तन्मात्रं दैवतं यस्येति नपुंसकेन विग्रहे तन्मात्रदैवतं[6] जनस्य अभिजनो जन्मभूमिः । केचित्तु व्याचक्षते - तन्मात्रदैवतजनानाम् अभिजनं[7] गोत्रं यस्य[8] स तथा । ईश्वर एव[9] गोत्रदेवता सर्वेषाम् इत्यर्थः । अभिजन-कुलम् । तथा चोक्तम् - कुलेऽप्यभिजनो जन्मभूम्यामपि (अमर० III.iii.108) ॥

1 B द्विपे 2 R किंभूता 3 B विवरीतुकामः 4 B repea. वृन्दानां ..... स्फुरिष्यति
5 B इव 6 R छिद्रे —॥४८॥ 1 B इच्चयो 2 B कृतं यो न 3 B कदापि 4 B
देवानि 5 B देव्याम्नो; R °त्याम्नो 6 R om. जनस्य ... °दैवत° 7 B अभिजातं
8 R यत्र 9 B °प्यभि° —॥४९॥

तथा अभिजनः कुले कुलध्वजे जन्मभूम्याम् ( १ ) तद् भिन्नाधिकरणो बहुव्रीहिः ॥४९॥

चूडाग्रचुम्बिमिहिरोदयशैलशीलस्तना: स्तनंधयसुधाकरशेखरस्य।
तस्मिन् सुवर्णरसभूषणरम्यहर्म्यभूभृद्धय धटय हेमघटावतंसाः॥५०॥

[चूडाग्रेति]। त्वं तत्र द्वीपे स्तनंधयो बालः सुधाकरश्चन्द्रः शेखरो यस्य तस्य[1] श्रीमहादेवस्य सुवर्णरसभूषणे[2] रम्याणि हर्म्याण्येव भूभृतः पर्वतास्तेषां घटाः श्रेणीः [घटय][3] कारय प्रासादान् रचय। किंभूताः? हेमघटाः सौवर्णाः[4] कलशा अवतंसा मुकुटा यासां तास्तथा। [पुनः] किंभूताः? चूडाग्रचुम्बी मिहिरः[5] श्रीसूर्यो यस्य स चासौ उदयशैलश्च[6] तस्य शीलं[7] शोभा तस्य[8] स्तनाश्चौरीः[9]। मस्तकस्थरवेरुदयाचलस्य शोभा(55a)नुकारिणीव प्रासादमाला: कलशैर्भान्ति। स्तनंधयघटशब्दौ स्तनपायकरिघटवाचकौ कलशमात्रसमूहवाचकौ। घटादयः षितः ( १ ) इति। षिद्भिदादिभ्योऽङ् (पा० III iii 104)॥५०॥

तस्मिन् मलिम्लुच इव स्मरकेलिजन्मधर्मोदबिन्दुमयमौक्तिकमण्डनं ते।
जालैर्मिलन्दधिमहोदधिपूरलोलकल्लोलचामरमरुत्तरुणि! छिनत्तु॥५१॥

[तस्मिन्निति]। हे तरुणि! तस्मिन् द्वीपे जालैर्गवाक्षविवरैर्मिलन्[1] [सन्] स चासौ[2] दधिमहोदधिपूरस्य लोलाः कल्लोला एव चामराणि तेषां मरुद्वायुः ते तव स्मरकेलेर्जन्म[3] येषां[4] ते[5] एते

1 B2 om. तस्य 2 B °सर° 3 B2 om. घटय 4 B2 सुवर्ण° 5 B B2 मिहर: 6 B °शीलश्च 7 B शोभं शैला° 8 B2 तस्याः 9 B चौरमे 10 B2 °घटाः—॥५०॥ 1 B2 जालैः.. मिलन् alt. वायुः 2 B2 om. स चासौ 3 B2 °केलिजन्म 4 B °षां 5 B2 तव ते ——॥५१॥

धर्मोदबिन्दवस्तन्मय मौक्तिकमण्डनं छिनत्तु । क इव ? । मलिम्लुच इव । यथा मलिम्लुचश्चौरो जालैर्गवाक्षविवरैः प्रविश्य मण्डनमपहरति ॥ ५१ ॥

एतद्यशो नवनवं खलु हंसवेशं वेशान्तसन्तरणदूरगमक्रमेण ।
अभ्यासमर्जयति सन्तरितुं समुद्रान् गन्तुं च निःश्रममितः सकलान् दिगन्तान् ॥ ५२ ॥

एतद्[यश इति] । एतस्य रास्रो यशो नवनवं[1] खलु इति मन्ये हंसवेशं हंसवेषं कृत्वा वेशान्तस्य[2] पल्वलस्य सरस्यादेः सन्तरणात् तरणयोगात्[3] [यो] दूरगमो विदूरगमनं[4] तस्य क्रमेण यथासङ्ख्यानुरोधेन[5] । सन्तरणं[च] दूरगमश्चेति द्वन्द्वो वा । किल समुद्रान् सन्तरितुमभ्यासमर्जयति[6] । तथा इतः[7] स्थानात् निःश्रमं श्रमरहितं यथा भवति तथा सकलान् दिगन्तान् गन्तुं च । [8]केचित्तु[9] दूरगं सदक्रमेण समुद्रान् तरितुं दिगन्तान् गन्तुमिति व्याचक्षते । [10]विशते येन इत्येके वाल्लव्यं रामाहुः । कर्मवेशाधिदि [?] त्यत्र तथा विचारात् इति[11] क्षीरस्वामी ॥ ५२[12] ॥

तस्मिन् गुणैरपि भृते गणनादरिद्रैस्तन्वी न सा हृदयबन्धमवाप भूपे ।
दैवे निरुन्धति[1] निबन्धनतां वहन्ति हन्त प्रयासपरुषाणि न पौरुषाणि ॥ ५३ ॥

तस्मिन्[गुणैरिति] । सा तन्वी तस्मिन् भूपे गणना-

1 B2 नवं नवं 2 B2 पल्वलादेः 3 B2 om. तरणयोगात् 4 B2 om. विदूरगमनं 5 B2 om. यथासङ्ख्यानुरोधेन 6 B सन्तरीतुं ; B2 तरितुं 7 B इव 8 B2 सन्तरणं .... द्वन्द्वो वा twice 9 B न 10 B2 om. विशते .... क्षीरस्वामी ॥ B अति 12 B om. 52. — ॥ ५३ ॥ 1 B2 text निरुन्धति —

सर्ग ११ 29

दरिद्रैर्गुणैरसङ्ख्यैः भृतेऽपि[2] हृदयबन्धं न अवाप[3] । हन्त इति खेदे ।
दैवे विरुन्धति सति विरुद्धे सति पौरुषाणि निर्बन्धनतां सिद्धेः[4]
कारणतां[5] न वहन्ति । किं भूतानि ? । प्रयासेन[6] परुषाणि ॥५३॥

ते निन्यिरे नृपतिमन्यमिमाममुष्मादंसावतंसशिबिकांशभृतः पुमांसः ।
रत्नाकरादिव तुषारमयूखलेखां लेखानुजीविपुरुषा गिरिशोत्तमाङ्गम् ॥
॥५४॥

ते निन्यिरे [इति] । ते अंसानां स्कन्धानाम् अवतंस-
भूतायाः[1] शिबिकायाः अंशस्यैकदेशस्य भृतः पुमांसः इमाम् अन्यं
नृपतिं निन्यिरे । कर्त्रभिप्रायविवक्षायामात्मनेपदम् । कुतः ? । अमुष्मात्
राज्ञः । यथा लेखानां देवानाम् अनुजीविपुरुषा भृत्या रत्नाकरात्
तुषारमयूखस्य[2] लेखां कलां गिरिशस्योत्तमाङ्गं निन्यिरे ॥५४॥

एकैकमद्भुतगुणं[1] धुतदूषणं च हित्वाऽन्यमन्यमुपगम्य[2] परित्यजन्तीम् ।
एनां जगाद जगदर्चितपादपद्मा पद्मामिवाऽच्युतभुजान्तरविच्युतां सा ॥५५॥

एकैकम् [इति] । सा जगताम् अर्चितौ पादपद्मौ
यस्याः[3] सा तथा एनां[4] जगाद । मतिबुद्धी(पा० ॥ ।।।88) त्यादिनाऽतीते[5]विहितस्य
क्तस्य बाधकमिति केनचिद् व्याकृतम् । तत्तु नाऽऽद्रियते । अतीतेऽपि
महाकविप्रयोगदर्शनात् । यथा - कौशिकाद्विदितशापये( ? )-
ति । उच्यते - अच्युतस्य श्रीकृष्णस्य भुजान्तराद्विच्युतां पद्मामिव ।

२ B2 धृतेऽपि 3 B आप 4 B2 om. विसर्गः 5 B कारणातां 6 B प्रायशो न-॥५३॥
1 B॰भूतयो 2 B॰मयूखलेखा — ॥५४॥
1 B2 text ॰मुद्गत॰ 2 B2 text ॰गत्य 3 B2 om. विसर्गः 4 B2 एतां 5 B2
अतीतं

किं कुर्वतीम्[6]? । एकैकं राजानम् अद्भुतगुणम् उद्गतगुणं[7] च तथा[8] धूत[9]-दूषणं निर्दोषं च हित्वा त्यक्त्वा अन्यम् अन्यं राजानम् उपगम्य[10] परि- /ग
त्यजन्तीम् । लक्ष्मीरपि सगुणं निर्दोषं हित्वा अन्यमन्यमुपगम्य त्यजति । चपलत्वात् । अत्र[11] जगतोऽर्चिताविति[12] विग्रहेन च पूजायामिति समास-प्रतिषेधात्, मतिबुद्धी (पा॰ III.ii.188) त्यादिसूत्रविहितक्तप्रयोगे, क्तस्य च वर्तमाने (पा॰ II.iii.67) इति षष्ठीविधानात् तृतीयानुपपत्तिरिति चेत्, तन्न । भूतकालसमा[सि]सामान्यविवक्षायां, निष्ठा (पा॰ III.ii.36) इत्यनेन क्तप्रत्यये, न लोकाव्यय (पा॰ II.iii.69) इति षष्ठीप्रतिषेधात् उपपत्त्या(त एव तृतीये(155b)ति । यद्यपि वर्तमाने लट् (पा॰ III.ii.123)-इत्यधिकृत्य, मत्याद्यर्थे वर्तमानक्तप्रत्ययस्य उक्तत्वात्, किञ्च अप-वादविषये क्वचिदुत्सर्गस्याऽपि समावेश इति मत्याद्यर्थेभ्यो भूतेऽपि निष्ठा भवत्येव । अन्यथा कथमेतदुक्तं भाष्यकारेण । तैः सूत्र-विन्यासोऽपि न कृत इति अलमतिप्रसङ्गेन ॥ ५५ ॥

---

ईशः कुशेशयसनाभिशये ! कुशेन द्वीपस्य लाञ्छिततनोर्यदि वाञ्छितस्ते ।
ज्योतिष्मता सममनेन वनीघनासु त्वं विनोदय घृतोदतटीषु चेतः ॥ ५६ ॥

---

ईशः [इति] । हे कुशेशयं पद्मं तस्य सनाभि सदृक् शयो[1] हस्तो यस्याः सा तथा । अयं कुशेन दर्भेण लाञ्छिततनोर्द्वीपस्य ईशो यदि ते तव वाञ्छितः । मतिबुद्धिपूजार्थेभ्यश्च (पा॰ III.ii.188) इति क्तः । क्तस्य च वर्त-मान (पा॰ II.iii.67) इति षष्ठी । तदनेन ज्योतिष्मता[2] [भिधेन] राज्ञा समं घृतो-दस्य समुद्रस्य तटीषु त्वं चेतो विनोदय । किंभूतासु? । वनी महद्वनं[3] वनसमूह—

---

6 R कुर्वन्ताम् 7 R om. उद्गतगुणं 8 B अथ 9 B धूत॰ 10 B ॰मवगम्या 11 R om. अत्र ... ॰प्रसङ्गेन 12 B ॰र्चित 13 R, R गति॰ — ॥ ५५ ॥

1 B कुशो 2 R ज्योतिष्मन्नाम्ना 3 R om. महद्वनं — ॥ ५६ ॥

सर्ग ११ 31

स्त्राभिर्धनासु ॥५६॥

वातोर्मिदोलनचलद्दलमण्डलाग्रभिन्नाभ्रमण्डलगलज्जलजातसेकः।
स्तम्बः कुशस्य भविताऽम्बरचुम्बिचूडश्चित्राय तत्र तव नेत्रनिपीयमानः॥५७॥

वातोर्मीति। हे भैमि! तत्र कुशस्य स्तम्बो[1] मूलप्रदेशो नेत्रै[2]र्निपीयमानः सन् तव चित्राय[3] भविता। किंभूतः[4]?। अम्बरचुम्बिनी[5] चूडाऽग्रभागो यस्य स तथा। पुनः किंभूतः?। वातस्य ऊर्मीणां दोलनेन चलत् यद्[6]दलानां मण्डलं तस्याऽग्रेण भिन्नम्। अथवा चलन्ति[7] दलान्येव मण्डलाग्राणि तैर्भिन्नं यद[8]भ्रमण्डलं तस्मात् गलता जलेन जातः सेको[9] यस्य स तथा॥५७॥

पाथोधिमाथसमयोत्थितसिन्धुपुत्रीपत्पङ्कजार्पणपवित्रशिलासु तत्र।
पत्या सहाऽऽवह विहारमयैर्विलासैरानन्दमिन्दुमुखि! मन्दरकन्दरासु॥५८॥

[1]पाथोधिमाथेति। हे इन्दुमुखि! तत्र त्वं पत्या सह मन्दरकन्दरासु विहारमयैर्विलासैरानन्दमावह। तत्र कृतवचने मयट्(पा-V.iv.२१)इति मयट्। किंभूतासु?। पाथोधेः[2] समुद्रस्य [माथ]समये उत्थिता या सिन्धुपुत्री लक्ष्मी[:] तस्याः पदावेव[3] पङ्कजे अथवा पद्ध्यः पदन्यासः तदा पद एव पङ्कजानि [4]कमलानि तेषाम् अर्पणेन पवित्रा[5] शिला यासां [तासु[6]]। शिलातलास्विति पाठे पवित्राणि शिलातलानि यासां तासु तथा॥

1 B स्तम्भो 2 R नेत्रे 3 B चित्रादि भविता 4 B R भूतम्; edt. भूतः 5 B अम्बु 6 R om. यत् 7 R चलिति 8 B यदाभ्र°; R om. यत् 9 B शोको —॥५७॥
1 B पयोधि° 2 B पयोधेः 3 B पदाविव; R om. पदावेव... तदा 4 R add. चरण° 5 B R om. तासु; edt. add. तासु 6 —
(R om. पवित्रा ... पाठे 6)

राजपुत्रीत्यादिवत्भाष्षीतत्पुरुषमाते दुहितुर्विभाषया पुत्रत्त्वमुशन्ति[7]।श्री

आरोहणाय तव सज्ज इवाऽस्ति तत्र सोपानशोभिवपुरश्मवलिच्छटाभिः।
भोगीन्द्रवेष्टशतघृष्टिकृताभिरब्धिक्षुब्धाचलः कनककेतकगात्रगात्रि! ॥५९॥

आरोहणायेति ]। हे कनककेतकस्य गात्रगात्रं यस्याः सा तथा। तत्र[1] अब्धेः समुद्रस्य क्षुब्धो मन्थाचलो[2] मन्दरस्तव आरोहणाय सज्ज इवाऽस्ति। किंभूतः?। अश्मनां [पा][3]षाणानां या वलय-स्तासां छटा उत्तरोत्तरपरिपाटीरूपास्ताभिः सोपानवत्[4] शोभि[5] वपुर्यस्य स तथा। किंभूताभिः?। भोगीन्द्रस्य मन्थननेत्रीभूतस्य वेष्टशतस्य घृष्टि-भिर्घर्षणैः कृताभिः। क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेष्विव(पा० VII।ii।१८)तीडभावः॥ ॥५९॥

मन्थानगः स भुजगप्रभुवेष्टघृष्टिलेखावलद्वलयनिर्झरवारिधारः[1]।
त्वन्नेत्रयोः स्वभरयन्त्रितशीर्षशेषशेषाङ्गवेष्टिततनुर्भ्रममातनोतु ॥६०॥

मन्थानग इति ]। स मन्थानगस्तव नेत्रयोः स्वस्याऽऽ-त्मनः पर्वतस्यैव भरेण यन्त्रितमाक्रान्तं शीर्षं यस्य एवंविधो यः शेष-नागस्तस्य शेषम्[2] अवशिष्टं[3] यदङ्गं पुच्छभागः तेन वेष्टितस्य तनोः [4]शरीरस्य भ्रमं भ्रान्तिम् आतनोतु [विस्तारयतु]। किंभूतः?। भुजगप्रभोः [सर्पाधिराजस्य] वासुकेर्मन्थननेत्रीकृतस्य वेष्ट[न]रूपस्य रज्जुभूतस्य [5]या घृष्टिस्त(156a)स्या लेखासु वलन्ती वलयाकारा। धवलेति पाठे धवला

7 B पुत्रवद्भाव० — ॥५८॥ 1 B अत्र 2 B मन्था: 3 B om. पाषाणानां
4 B वन् 5 B शोभी — ॥५९॥ 1 B ~~text~~ ०चलद्वल० 2 B शेषो
3 B add. उद्धृतम् 4 B add. स्व० 5 B वलयाकारो; B om. वलया०... पाठे

निर्झरस्य वारिधारा[6] यस्य स तथा ॥६०॥

एतेन ते स्तनयुगेन सुरेभकुम्भौ पाणिद्वयेन दिविषद्द्रुमपल्लवानि।
आस्येन स स्मरतु नीरधिमन्थनोत्थं स्वच्छन्दमिन्दुमपि सुन्दरि! मन्दराद्रिः॥ ॥६१॥

एतेन [इति] । हे सुन्दरि! स[1] मन्दराद्रिरेतेन[2] ते तव स्तनयुगेन सदृशेन दृष्टेन [3]सुरेभस्यैरावणस्य कुम्भौ यथानुभवं स्मरतु। [4]ते तव पाणिद्वयेन दिविषदां[5] द्रुमस्य कल्पवृक्षस्य पल्लवानि[6] स्मरतु। तवाऽऽस्येन [7]क्षीरधेर्मन्थनोत्थम् इन्दुं च स्मरतु। स्वच्छन्दं स्वैरम् ॥६१॥

वेदैर्वचोभिरखिलैः कृतकीर्तिरत्ने हेतुं विनैव धृतनित्यपरार्थयत्ने।
मीमांसयेव भगवत्यमृतांशुमौलौ तस्मिन्महीभुजि तयाऽनुमतिर्न भेजे ॥६२॥

वेदैः [इति] । तया तस्मिन् महीभुजि अनुमतिरनुज्ञा न भेजे। किंभूते? वेदैः सत्यैरथ वा वेदैः श्रुतिभिरखिलैरपि वचोभिः कृतं कीर्तिरत्नं यस्य तस्मिंस्तथा।[1] ज्योतिष्मान्वेदविष्णुपुराणप्रभृतिषु च प्रसिद्धः। तथा हेतुं कारणं विना एव धृतो नित्यं परार्थे यत्नो येन तत्र तथा। कया इव? मीमांसया[2] इव। यथा पूर्वमीमांसया भगवति अमृतांशुमौलौ[3] ईश्वरेऽनुमतिर्न[4] भज्यते। किंभूते? वेदैः? श्रुतिभिरखिलैरपि [5]वचोभिर्वाक्यैः। कृतकीर्तिरत्ने[6] तथा निष्कारणपरार्थपरायणे[7]।

6 B °धरा — ॥६०॥
1 P2 om. स 2 B मदिरा° 3 B सुरेत° 4 B तथा 5 P2 °षद्द्रुमपल्लवानि
6 P2 add. पारिजातपल्लवानि 7 P2 नीरधि° — ॥६१॥
1 P2 ज्योतिष्मान् वेदे विष्णुपुराणे प्रभृतिषु 2 B मीमांसा 3 P2 ईश्वरेण 4 P2 अनुमति 5 P2 om. वचोभिः 6 P2 °कीर्तौ तथा 7 P2 °परायणो ——

तथा च श्रुतिः - एक एव रुद्रोऽवतस्थे ( १ )[8] । अपरा च श्रुतिः - यः सर्वज्ञः सर्ववित् (मु० १.१.९) इत्यादिभिर्वचोभिर्वेदैः श्रुतिः[9] मीमांसा यदि ईश्वरमङ्गीकुरुते, तदा[10] वेदानामनित्यत्वं पौरुषेयत्वात् प्राप्नोति। तथा[11] चाप्रामाण्यं कालिदासादिवाक्यवत् स्यात्[12] । तत्श्चेश्वरं न मनुते॥ ॥६२॥

तस्मादिमां नरपतेरपनीय तन्वीं राजन्यमन्यमथ जन्यजनः स निन्ये।
स्त्रीभावभावितपदामविमृश्य याच्ञामर्थी निवर्त्य विधनादिव वित्तवित्तम्॥ ॥६३॥

तस्मादिति॥ अथ स[1] जन्यजनः इमां तन्वीं तस्मान्नरपतेरपनीय अन्यं[2] राजन्यं निन्ये।[3] कर्त्रभिप्रायक्रियाफलविवक्षया आत्मनेपदम्। यथा अर्थी (अ)विमृश्य कृतां याच्ञां[4] विधनात् [निर्धनात्] निवर्त्य वित्तैर्वित्तं[5] ~~पुरुष~~ प्रसिद्धं पुरुषं[6] नयति। किंभूताम्? [7]स्त्रीणां भावा रत्याद्याः स्थायिनो, निर्वेदाद्या व्यभिचारिणः, स्तम्भाद्याः सात्त्विकास्तैर्भावितं प्राप्तं पदं स्थानं यस्याः सा तथा। याच्ञा तु स्त्रियां भावे। भावितम् उत्पादितं पदं सुबन्तमभिधायकं यस्य अभिधेययोस्तां तथा। तथा च यजयाचयतविच्छप्रच्छरक्षो नङ् (पा० ३.३.९०)- ति। अत्र पदमञ्जर्यां हरदत्तमिश्रः - नङन्ताः सर्वे ~~[illegible]~~षु स्त्रीलिङ्गा इति। भावे (पा० ३.३.१८) इत्यतश्च भावेऽधिकारोऽनुवर्तते। श्रीभावेति श्रीभावेन लक्ष्मीत्वेन भावितं पदं यस्या[8]ः। अथवा श्रियो लक्ष्म्या भावेन[9] भावितं सत्तया सम्भाविते पदे यस्यास्तां तथा। सश्रीकचरणां /त पञ्जे श्रियो लक्ष्म्या भावेन सत्तया भावितं पदं यस्यास्तां तथा। [illegible] /य

---

8 P2 ०वतरस्थे 9 B श्रुते० 10 B तथा 11 P2 ततश्च 12 P2 om. स्यात् — ॥६२॥

1 B जन्यजनः स 2 B राजानं 3 P2 om. कर्त्र०... आत्मनेपदम् 4 B विधा० 5 P2 वित्तैः वित्तम् 6 B नयते 7 P2 om. स्त्रीणां.... श्रीभावेति 8 P2 यस्यां 9 P2 भाविते

श्रीस्तत्र[10] याच्ञा क्रियते एव।[11] अविमृश्येति, ऋदुपधाच्चाक्लृपिचृतेरि- (पा० III.i.110)ति क्यप्। ल्यबन्तं वा। संज्ञायां जन्या (पा० IV.iv.82) इति निपातः॥६३॥

---

देवी पवित्रितचतुर्भुजवामभागा वागालपत् पुनरिमां [1]गरिमाभिरामाम्।
अस्याऽरिनिष्कृपकृपाणसनाथपाणेः पाणिग्रहादनुगृहाण गणं गुणानाम्॥६४॥

---

देवीति। देवी [2]भारती वाक् पुनरिमामालपत्। किंभूता? पवित्रितः चतुर्भुजस्य वामभागो यया सा तथा। [3]आगमे हि सरस्वती श्रीकृष्णस्य शक्तिरूपतया पत्नीत्वेन श्रूयते। किंभूताम्? [4]गरिम्णा अभिरामाम्। हे भैमि! अस्य पाणिग्रहात् गुणानां गणमनुगृहाण। किंभूतस्य? अरिषु [5]निष्कृपेन कृपाणेन सनाथः पाणिर्यस्य तस्य तथा॥६४॥

---

द्वीपस्य शाल्मल इति प्रथितस्य नाथः पाथोधिना वलयितस्य सुराम्बुनाऽयम्।
अस्मिन् वपुष्मति न विस्मयसे गुणाब्धौ रक्ता तिलप्रसवनासिकि! नाऽसि किं वा॥६५॥

---

द्वीपस्येति। अयं शाल्मल[1] इति प्रथितस्य द्वीपस्य नाथः। किंभूतस्य? सुराम्बुना पाथोधिना [2]वलयितस्य। तिलस्य प्रसवं पुष्पं तद्वत् नासिका यस्यास्तस्याः [3]सम्बोधनम्। [4]त्वम् अस्मिन् नाम्ना [5]वपुष्मति [6]राजनि गुणस्य अब्धौ समुद्रे किं न विस्मयसे? किं वा रक्ता अनुरागपरा नाऽसि न [7]भवसि। [8]समर्थप्रतिरूपकर्म आसीत्यध्यर्थं वा॥६५॥

---

10 P2 एव ... 11 P2 विमृश्य —॥६३॥ 1 P2 ... गिरि० 2 B वाक् भारती 3 P2 आगमेषु 4 B गरिम्णा 5 P2 निः० —॥६४॥ 1 B शाल्मली 2 P2 वलयितस्य हे 3 P2 ... तस्याः 4 P2 ... त्वं 5 P2 वपुष्मति 6 P2 राजगुणसमुद्रे 7 B P2 भवेति 8 P2 ... समर्थ... कर्म —॥६५॥

सर्ग ११ 36

विप्रे धयत्युदधिमेकतमं त्रसत्सु यस्तेषु पञ्चसु बिभाय न सीधुसिन्धुः।
तस्मिन्ननेन च निजालिजनेन च त्वं सार्धं विधेहि मधुरा मधुपानकेलीः ॥
॥६६॥

विप्रे [धयतीति]। तस्मिन् समुद्रे[1] त्वम् अनेन राज्ञा च निजेनाऽऽलिजनेन च सार्धं मधुरा मधुपानस्य [केलीः] विधेहि। यः [2]सीधुसिन्धुः सुराब्धिर्विप्रेऽगस्त्ये एकतममुदधिं धयति चुलुकं कृत्वा पिबति सति तेषु पञ्चसु समुद्रेषु [3]त्रसत्सु सत्सु [4]न बिभाय। [5]ब्राह्मणस्य [6]सीधुविषये, नित्यं मद्यं ब्राह्मणो वर्जयेदि( ? ) इति निषेधात्। क्वचित्तु [7]शीधुशब्दोऽपि। यथा – पीतशीधु[7]मदि[8]रैर्मिथुनानामि (शिशु० X। ।)-ति ॥६६॥

द्रोणः स तत्र वितरिष्यति भाग्यलभ्यसौभाग्यकार्मणमणीनुपदां[1] गिरिस्ते।
तद्द्वीपदीप इव दीप्तिभिरौषधीनां चूडाग्रमिलज्जलदकज्जलदर्शनीयः ॥६७॥

द्रोणः [स तत्रेति]। तत्र स द्रोणनामा गिरिर्भाग्येन लभ्यं यत् सौभाग्यं तस्य [2]कार्मणभूतान् वशीकरणान् [मणीन्][3] [ते] तव उपदां वितरिष्यति। उत्प्रेक्ष्यते – औषधीनां दीप्तिभिस्तस्य द्वीपस्य दीप इव। तथा चूडाग्रे मिलन्तो जलदा एव कज्जलं [4]तेन दर्शनीयः। [5]कार्मणमयीमिति पाठे [कार्मण]रूपामिति व्याख्येयम् ॥६७॥

तद्द्वीपलक्ष्मपृथुशाल्मलितूलजालैः श्रोणीतले मृदूनि मारुतचारुकीर्णैः।
लीलाविहारसमये चरणार्पणानि योग्यानि ते सरससारसकोषमृद्धि[1]! ॥६८॥

1 B त्वं समुद्रे 2 B सिन्धुः सीधु 3 B भ्रमत्सु 4 R च विभावय 5 R om. ब्राह्मणस्य
सीधुविषये 6 B R सिन्धु°, edd. सीधु° 7 B R सिन्धु° 8 B °मदिरे —॥६६॥
1 R + पU x r °मयी° 2 B कर्मणा 3 R om. ते; edd. add ते 4 R तत 5 R मणिरूपा° —॥६७॥
1 R + पU x r °कोश° —

तद्वीपान्तेऽमेति] । हे सरसं यत सारसा सरसिज तस्य कोषस्तद्वत् मृदुनि ! तत्र श्रोणीतले [ते] तव चरणार्पणानि योग्यानि । क्व ? लीलाविहार[स]मये । किंभूते तले ? । तस्य द्वीपस्य लक्ष्म चिह्नं यः पृथुः शाल्मली वृक्षः तस्य तूलजालैर्मृदुनि । किंभूतैः ? । मारुतेन चारुकीर्णैः ॥६८॥

एतद्गुणश्रवणकालविजृम्भमाणतल्लोचनाञ्चलनिकोञ्चनसूचितस्य ।
भावस्य चक्रुरुचितं शिबिकाभृतस्ते तामेकतः क्षितिपतेरपरं नयन्तः ॥६९॥ /रं

एतत [इति] । ते शिबिकाभृतो भावस्याऽभिप्रायस्य [उचितं] सदृशं चक्रुः । किंभूतस्य भावस्य ? । एतस्य राज्ञो गुणानां श्रवणकाले विजृम्भमाणायास्तस्या यो लोचनाञ्चलस्तस्य निकोचनेन सूचितस्य । जृम्भसमये हि चक्षुःप्रान्तस्य स्वभावान्निमीलनं भवति । विजृम्भमाण इति लोचनाञ्चलविशेषणं वा । किं कुर्वन्तः ? । एकस्मात [क्षितिपतेः] राज्ञः सकाशात् अपरं राजानं तां नयन्तः ॥६९॥

तां भारती पुनरभाषत नन्वमुष्मिन् काश्मीरपङ्कमिषलग्नजनानुरागे ।
श्रीखण्डलेपमयदिग्जयकीर्तिराजिराजद्भुजे भज महीभुजि भैमि ! भावम् ॥७०॥

तां भारती[ति] । भारती देवी तां पुनरभाषत । ननु हे भैमि ! अमुष्मिन् मही[भुजि] भावं भज । किंभूते ? । काश्मीरस्य कुङ्कुमस्य पङ्कमिषेण लग्नो जनानुरागो यत्र तस्मिंस्तथा । तथा श्रीखण्डलेपमयी या दिग्जयकीर्तिराजिः तया राजन्तौ भुजौ यस्य तस्मिंस्तथा ॥७०॥

2 B सरयत सं 3 R om. ते; edi. add. ते 4 B वदे 5 B द्विपस्य 6 R °ल्लित्वं वृक्षा: ॥६८॥

1 R om. उचितं; edi. add. उचितं 2 R om. भावस्य 3 R om. तस्या 4 R om. °अञ्चल° 5 B कुर्वन् 6 R om. क्षितिपतेः 7 R om. राजानं 8 B नयत; R om. विसर्ग ॥६९॥

1 B + R °निभ° 2 B देवता 3 B अथ आखण्ड° 4 B/R दिग्विजय°; edi. दिग्जय° ॥७०॥

द्वीपं द्विपाधिपतिमन्दपदे! प्रशास्ति प्लक्षोपलक्षितमयं क्षितिपस्तदस्य।
मेधातिथेस्त्वमुरसि स्फुर सृष्टसौख्या साक्षाद्यथैव कमला यमलार्जुनारेः॥७१॥

द्वीपम् [इति]। हे द्विपाधिपतिवत्[1] मन्दं पदं यस्यास्तस्याः[2] सम्बोधनम्। अयं क्षितिपः प्लक्षाख्योपलक्षितं द्वीपं प्रशास्ति। तत्त्वम् अस्य मेधातिथिनाम्न उरसि हृदये[3] स्फुर विलस।[4] सृष्टसौख्या सती। यथा साक्षात् कमला प्रत्यक्षा[5] श्रीर्यमलार्जुनयोर्वृक्षयोररेः श्रीकृष्णस्य उरसि स्फुरति॥७१॥ (न

प्लक्षे महीयसि महीवलयातपत्रे तत्रोक्षिते खलु तवाऽपि मतिर्भवित्री।
खेलां विधातुमधिशाखविलम्बिदोलालोलाखिलाङ्गजनराजजितानुरागे॥
॥७२॥

(1579) प्लक्षे [इति]। तत्र खलु महीयसि प्लक्षे महीवलयस्याऽऽतपत्रे ईक्षिते सति तवाऽपि खेलां विधातुं मतिर्भवित्री। किंभूते?। [1]अधिशाखं विलम्बिनीषु दोलासु आन्दोलनेषु लोलाखिलाङ्गा[2]। या नी जनतास्तासां ताभिर्वा जनितोऽनुरागो[3] येन तत्र तथा॥७२॥

पीत्वा तवाऽधरसुधां वसुधासुधांशुर्न श्रद्दधातु रसमिक्षुरसोदवाराम्।
द्वीपस्य तस्य दधतां परिवेषवेषं सोऽयं चमत्कृतचकोरचलाचलाक्षि!॥७३॥

पीत्वा [इति]। हे चमत्कृतचकोरस्येव चलाचले अक्षिणी[1] यस्याः तस्याः सम्बोधनम्। सोऽयं राजा वसुधायाः सुधांशुश्चन्द्रः। तवाऽधरसुधां पीत्वा इक्षुरसोदस्य समुद्रस्य वाराम् उदकानां [2]रसं न

1 B तव 2 F om. तस्याः 3 F om. हृदये 4 B सृष्ट॰ 5 F om. प्रत्यक्षा —॥७१॥
1 B अध: 2 B॰ लाङ्गयो 3 B यत — ॥७२॥
1 F om. यस्याः 2 B रसं त ——— ॥७३॥

अदधातु। किंभूतानाम्?। तस्य द्वीपस्य परिवेषस्य वेषं सादृश्यं दधताम्।।७३॥

---

सूरं न सौर इव नेन्दुमपीक्ष्य तस्मिन् नाश्नाति यस्तदितरत्रिदशाभिसः।
तस्यैन्दवस्य भवदास्यनिरीक्षयैव दर्शेऽश्नतोऽपि न भवव्रतकीर्णिभाव:।।७४॥/त्य

---

सूरम् [इति]। तस्मिन् द्वीपे य इन्दुम् अपीक्ष्य अदृष्ट्वा न अश्नाति। किंभूतः?। तस्माच्चन्द्रादितरो यस्त्रिदशो देवस्तत्राऽनभिसः। तत्रैव भक्तः। क इव?। सौर इव। सूर्यभक्तो यथा सूरम् अवीक्ष्य न अश्नाति। तथा य इन्दुव्रती तस्यैन्दवस्य दर्शे अमावास्यायाम् अश्नतो भुञ्जानस्याऽ-व्रतकीर्णिभावो व्रतलोपो न भवतु। कया?। भवत्या आस्यस्य निरीक्षयैव। यतस्तव मुखं चन्द्र एव। इन्दौ भक्तिरस्य, तत्र भक्तिरि( ? )त्यण्प्रत्ययः॥ ॥७४॥

---

उत्सर्पिणी न किल तस्य तरङ्गिणी या त्वन्नेत्रयोरहह तत्र विपाशि जाता।
नीराजनाय नवनीरजराजिरास्तामस्राऽञ्जसाऽङ्गुरज राजनि राजमाने।।७५॥

---

उत्सर्पिणीति]। अहह इति हर्षे। तस्य द्वीपस्य या विपाट् नाम्नी तरङ्गिणी नदी उत्सर्पिणी। तस्येति सम्बन्धे षष्ठी। उत्क्रम्य सर्पतीत्येवंशीला। एवंविधा न। आवृत्त्या कर्मषष्ठ्यपि। तस्य द्वीपस्य नोत्सर्पिणी। ऊर्ध्वं सर्पतीत्येवंशीला। नानाधिका किन्तु द्वीपवर्षसमाना। स्वस्य द्वीपस्य सुखदं नाम यद्वर्षं तस्य मर्यादामतिक्रम्य वर्षान्तरं न गच्छति। तस्मादेव वर्षात् समुद्रगा। तथा च विष्णुपुराणोक्तप्लक्षद्वीपस्य

---

1 R+ex नश्नाति 2 R om. अदृष्ट्वा 3 R अदृष्ट्वा 4 B अश्नानो 5 R om. भुञ्जानस्य 6 R °भाव 7 R यत: alt. एव 8 R इव —॥७४॥
1 B वर्षे 2 B उत्सर्पिणा 3 R om. आवृत्त्या.... तस्य 4 R add. वर्षस्य 5 R om. न 6 B °पुराणे

[7]शान्तभियादीनि सप्तवर्षाणि अनुक्रम्योत्क्रम् – तेषां नद्यश्च[8] सप्तैव वर्षाणां [तु] समुद्गाः। नाम(तस्ता:) प्रवक्ष्यामि श्रुताः पापं हरन्ति याः ॥II.iv.10॥ अनुतप्ता [9]शिखी चैव विपाशा त्रिदिवाक्लमुः[10]। अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः ॥11॥ [11]पुनर्विष्णुपुराणे[12] – अवसर्पिणी न तेषां च[13] तथैवोत्सर्पिणी न[14] । वा च ॥ II.iv.36॥ पिबन्ति तेषां तोयानि ॥ अस्यार्थः – तेषु द्वीपेषु याः प्रत्येकं[15] नद्यो मुख्याः सन्ति तासां तोयानि द्वीपस्था जनाः पिबन्ति। तथा नदीनां मध्यात् [16]काचित् अवसर्पिणी तद्वीपेभ्यः सकाशात् हीना न चोत्सर्पिणी, नाधिका[17], किन्तु द्वीपेषु लोकोपयोगयोग्या [18]पुनस्तथैव[19]-ताः पिबन्ति सदा हृष्टा नदीर्जनोपदास्तु ते। अवसर्पिणी [न] तेषां च ता एवोत्सर्पिणी [द्विजः] ॥ II.iv. ॥ इति श्रूयते। [21]तस्यां विपाशि जाता नवसरोजराजिः तव नेत्रयोर्नीराजनाय अवतारणाय आस्ताम्। तस्यां जाता सरोजराजिस्त्वत्[22] नेत्रयोरुपरि उत्तार्य त्यज्यताम्। अथ च तरङ्गावत्यपि त्वन्नेत्रयोर्नोत्सर्पिणी। तरङ्गिणीति श्लिष्टम्। नेत्रे किल तरङ्गयुक्ते। नद्यपि तरङ्गावती। तथाऽपि नैवाऽधिका किन्तु हीनैव। अतएवाव्ययीभाव-सन्धौ त्वन्नेत्रयोरिति पदं तस्मात्त्वम् [अत्र] राजमाने राजनि [अञ्जसा][23] सत्यभावेन [अनु]रज्य ॥७५॥

एतद्यशोभिरखिलेऽम्बुनि सन्तु हंसा दुग्धीकृते तदुभयव्यतिभेदमुग्धाः।
क्षीरे पयस्यपि पदे द्वयवाचिभूयं नानार्थकोषविषयोऽधि मृषोधिमस्तु ॥७६॥

7 B शान्तभयादिति 8 om. तु 9 B शिखी 10 B अवक्रमुः 11 E या विपाट्.... द्वीप-समाना ... 12 E तथा च 13 om. न चैवो॰ 14 om. ... 15 E प्रत्येकं 16 B नावि॰; E ... तत 17 E न चाधिका 18 E om. पुनः 19 तथा च ... श्लेषेण यत तरङ्गयुक्ताऽपि किल तव नेत्रयोः न उत्सर्पिणी; ... om. ता... इति श्रूयते 20 B ... वर्षाणां न अवसर्पिणी 21 E तस्यां... आस्तां ... उत्तार्य त्यज्यताम् 22 E त्वत् 23 B E om. अञ्जसा; ... अञ्जसा — ॥७५॥

सर्ग ११ 41

एतद्यशोभिरिति। हंसा एतस्य राज्ञो यशोभिरखिलेऽम्बुनि[1] दुग्धीकृते सति तस्योभयस्य यो व्यतिभेदः परस्परं पृथग्भावस्तत्र मुग्धाः मोहं गताः सन्तु। अथ क्षीरे पदे तथा पयसि पदेऽपि [यत्] द्वयवाचित्वम् अर्द्धद्वयवाचित्त्वं मृषोद्यम् अस्तु। किंभूतम्?। नानार्थकोऽ(157b)षस्याऽनेकार्थाभिधानकोशस्य विषयः। क्षीरशब्दो दुग्धजलयोर्वाचकः। पयःशब्दोऽपि[2]। यशसा सर्वं धवलीकृतम्। अतस्तदपि मृषा भवतु॥ ॥७६॥

ब्रूमः किमस्य नलमप्यलमाजुहूषोः कीर्तीः स चैष च समादिशतः स्म कर्तुम्।
स्वद्वीपसीमसरिदीश्वरपूरपारवेल्ला[1]बेल्लाक्रमणविक्रममक्रमेण ॥७७॥

ब्रूमःइति। हे देवि! वयम् अस्य किं ब्रूमः?। किंभूतस्य?। नलमप्यलम् आजुहूषोः स्पर्द्धितुमिच्छोः। यत् स च [नलः] एष [च] राजा ताः स्वाः कीर्तीः[2] स्वस्य द्वीपस्य सीम्नि यः सरितामीश्वरस्तस्य समुद्रस्य पूरपारे या वेल्लाः[3] पारतटं तस्य वल्लेनाऽऽक्रमणेन[4] विक्रमं कर्तुम्। अचलेति[5] पाठे वेल्लाया अचलानां पर्वतानामाक्रमणेन[6] इति व्याख्येयम्। समादिशतः स्म। केन?। अक्रमेण युगपत्॥७७॥

अम्भोजगर्भरुचिराऽथ विदर्भसुभ्रूस्तं गर्भरूपमपि रूपजितत्रिलोकम्।
वैराग्यरूक्षमवलोकयति स्म भूपं दृष्टिः पुरत्रयरिपोरिव पुष्पचापम्॥७८॥

अम्भोजेति। अथ सा अम्भोजगर्भवत्[1] रुचिरा विदर्भसुभ्रूः तं भूपं वैराग्येण रूक्षं यथा भवति तथाऽवलोकयति[2] स्म।

1 B दुग्धी° 2 B यशः° —— ॥७६॥
1 B +ext च्चला° 2 B तस्य; edt. स्वस्य 3 B पर° 4 B ऽक्रमणे 5 B ऽपि 6 B क्रमणे —॥७७॥ | 1 B om. ऽगर्भवत् रुचिरा वि° 2 B विलोक ——

सर्ग ११ 42

किंभूतम्? गर्भरूपमपि। बाल्येऽपि रूपेण जितास्त्रयो लोका येन तं तथा। यथा पुरत्रयरिपोर्दृष्टिः पुष्पचापं स्वयम् [3]अवलोकितवती। दृष्टिरपि अम्भोजगर्भरुचिरा। कामो रूपजितत्रिलोकश्च ॥७८॥

---

ते तां ततोऽपि चकृषुर्जगदेकदीपादंसस्थलस्थितसमानविमानदण्डाः।
चण्डद्युतेरुदयिनीमिव चन्द्रलेखां सोत्कण्ठकैरववनीसुकृतप्ररोहाः ॥७९॥

---

ते ताम् [इति]। ते [1]अंसस्थलेषु स्थिताः समानोऽन्यूनातिरिक्तो विमानदण्डो येषां ते जन्याः तां ततोऽपि ज[ग]ताद्[2]एक-दीपात् राज्ञः सकाशात् चकृषुः। यथा सो[3]त्कण्ठा या कैरववनी [त]स्याः सुकृतप्ररोहाः जगदेकदी[पात्] चण्डद्युतेः श्रीसूर्यात् [4]उदयिनीं चन्द्रलेखां कर्षन्ति। अमावास्यायां [श्रीसूर्य]मिलितश्चन्द्रः प्रतिपदि मण्डलाद्बहिर्निःसरति ॥७९॥

---

भूपेषु तेषु न मनागपि दत्तचित्ता विस्मेरया वचनदेवतया तयाऽथ।
वाणीगुणोदयतृणीकृतपाणिवीणानिर्वाणया पुनरभाणि मृगेक्षणा सा ॥८०॥

---

भूपेषु [इति]। अथ तया वचनदे[1]वतया सा मृगेक्षणा पुनरभाणि। किंभूता? तेषु भूपेषु मनागपि न [2]दत्तचित्ता। किंभूतया? विस्मेरया साश्चर्यया। [3]पुनः किंभूतया? वाण्या गुणोदयेन माधुर्येण तृणीकृतः पाणिवी[4]णा-निर्वाणो यया [5]तया [तथा] ॥८०॥

---

3 P2 आलोक° —— ॥७८॥ 1 B अन्त° 2 B प्लअहीपात 3 P2 °कण्ठायाः कैरव-वन्याः 4 B उदयिनां —— ॥७९॥

1 P2 °देव्या 2 B चित्तदत्ता; P2 दत्तचित्ता 3 P2 om. पुनः 4 P2 °वीणाया
5 P2 om. तया —— ॥८०॥

यन्मौलिरत्नमुदितासि स एष जम्बूद्वीपस्त्वदर्थमिलितैर्युवभिर्विभाति।
दोलायितेन बहुना भवभीतिकम्प्रः कन्दर्पलोक इव खात्पतितस्त्रुटित्वा॥८१॥

यन्मौलि[रत्नमिति]। हे भैमि! यस्य द्वीपस्य[1] मौलिरत्नं मुकुटचूडारत्नम्[2] उदितासि[3] स एष जम्बूद्वीपस्त्वदर्थं[4] मिलितैर्युवभिर्विभाति।[5] द्व्यन्तरुपसर्गेभ्योऽप ईत् (पा० VI। iii। ९७) इति। उत्प्रेक्ष्यते – खात् आकाशात् त्रुटित्वा पतितः कन्दर्पलोक इव। केन पतितः?। बहुना दोलायितेन चलत्वेन। किंभूतः?। भवात् श्रीमहादेवात् या भीतिस्तया[6] कम्प्रः। या कम्पमानः॥[7]८१॥

विष्वग्वृतः परिजनैरयमन्तरीपैस्तेषामधीश इव राजति राजपुत्रि!।
हेमाद्रिणा कनकदण्डमहातपत्रः कैलासरश्मिचयचामरचक्रचिह्नः॥८२॥

विष्व[गिति]। हे राजपुत्रि! अयं द्वीपस्तेषां द्वीपानाम् अधीश इव राजेव राजति। किंभूतः?। अन्तरीपै[र्द्वीपैः] अन्यैः परिजनैरपि विष्वक् समन्तात् वृतो वेष्टितः। किंभूतः?। हेमाद्रिणा कनकदण्डं [महो]त्पत्रं यस्य स तथा। कैलासस्य ये रश्मयस्तेषां चय एव चामराणां चक्रं तदेव चिह्नं राजलक्षणं यस्य स तथा।[1] अन्तरशब्दादप ईत्॥८२॥

एतत्तरुस्तरुणि! राजति राजजम्बूः स्थूलोपलानिव फलानि विमृश्य यस्याः।
सिद्धस्त्रियः प्रियमिदं निगदन्ति दन्तियूथानि केन तरुमारुरुहुः पथेति॥८३॥

1 B द्विपस्य 2 R भूता त्वम् 3 B उदता° 4 R om. विसर्गः 5 R om. द्व्यन्त°... इति 6 R भीत्या 7 B २। —॥८१॥

1 R om. अन्तरशब्दादप ईत्॥८२॥

एतान्तरुरिति]।[हे तरुणि!] एतस्य द्वीपस्य तरुः राज-जम्बू राजति यस्याः] फलानि स्थूलानुपलान् पाषाणानिव[1] विमृश्य मत्वा सिद्धानां स्त्रियः प्रियं भर्त्तारमिदमिदमिति[2] निगदन्ति। हे प्रिय! एतानि दन्तियूथानि केन पथा] तरुं जम्बूम् आरुरुहुः। हस्तिप्रमाणानि फलानि दृष्ट्वा तासां[3] भ्रान्तिर्जातेत्यर्थः॥८३॥

---

जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना कृत्स्नाऽपि सा तव रुचा विजितश्रि यस्याः।
तज्जाम्बवद्रवभवाऽस्य सुधाविधाम्बुर्जम्बूसरि[1]द्वहति सीमनि कम्बुकण्ठि॥
॥८४॥

---

जाम्बूनदमिति]।[2]कम्ब्वाकृतिस्त्रिवलया ग्रीवा यस्यास्तस्याः सम्बोधनम्। हे कम्बुकण्ठि! (158 a) रेखात्रयाङ्कितग्रीवे! अस्य द्वीपस्य सीमनि सा जम्बू नाम्नी सरित्[3] वहति। किंभूता? तस्य वृक्षस्य यो जम्बूफलो[4]द्भवो [द्रवो] रसस्तदुद्भ[5]वा। अन्ये - सा चासौ जाम्बवद्[6]द्रवभवा चेति व्याचक्षते। यच्छब्दानुरोधात्। केचित्तु विपर्यासेनाऽर्द्धद्वयं पठन्ति। तथा सुधाविधि[7]म् अमृतसदृशम् अम्बु यस्याः सा तथा। यस्याः नद्याः सा कृत्स्नाऽपि मृत्स्ना मृत्तिका जगति जाम्बूनदं सुवर्णमि[8]ति विश्रुतिं प्रसिद्धिम् एति। किंभूतम्? तव रुचा विजिता श्रीर्यस्य तत्तथा॥८४॥

---

अस्मिन् जयन्ति जगतीपतयः सहस्रमस्राश्रुसार्द्रिरिपुलक्षनितेषु तेषु।
रम्भोरु! चारु कतिचित्तव चित्तबन्धिरूपान्निरूपय मुदाऽहमुदाहरामि॥८५॥

---

1 B2 ०मिव 2 B2 om. इदमिति 3 B2 ताभ्यां सं० —॥८३॥
1 B2 text ०जम्बूः 2 B यस्याः ... यस्य तत्तथा here; B2 om. कम्ब्वा० ... सम्बोधनम्। 3 B वहवै 4 B2 फलभवा 5 B तद्द्रवे 6 B2 B2 ०द्रवभवा 7 B2 ०विध 8 B2 ०मपि 9 B विश्रुतं; B2 om. विश्रुतिं 10 B प्रसिद्धम् 11 B 7M. —॥८४॥

अस्मिन्[इति] । अस्मिन् द्वीपे जगतीपतयः सहस्रं जयन्ति । हे रम्भोरु ! त्वं चारु यथा भवति निरूपय । तेषु मध्ये अहं कतिचित्तव चित्तबन्धि[1] रूपं येषां तांस्तथाविधान् मुदा उदाहरामि । किंभूतेषु ? । अस्त्रैः[2] रुधिरैरश्रुभिर्यथासङ्ख्यं सार्द्रा विपक्षस्तेषां रिपूणां[3] वनिताश्च येषां तेषु तथा । रुधिरैः[4] रिपूणां सार्द्रत्वम् अश्रुभिश्च[5] रिपुकलत्राणां च । [6]सान्द्रेति पाठान्तरम् ॥८५॥

प्रत्यर्थियौवतवतंसतमालमालोन्मीलत्तमःप्रकरतस्करशौर्यसूर्ये ।
अस्मिन्नवन्तिनृपतौ गुणसन्ततीनां विश्रान्तिधामनि मनो दमयन्ति ! किं ते ॥८६॥

प्रत्यर्थि[इति] । हे दमयन्ति ! अस्मिन्नवन्त्याः उज्जयिन्याः नृपतौ[1] किं ते तव मनो वर्त्तते ? । किंभूते ? । गुणसन्ततीनां विश्रान्तिधामनि विश्रामस्थानके[2] । पुनः किंभूते ? । प्रत्यर्थिनां [यौवतस्य[3]] युवतिसमूहस्य वतंसरूपा[4] या तमालमाला[5] पुष्पमाला सैव उन्मीलत्तमःप्रकरस्तस्य[6] तस्करो हर्त्ता शौर्यमेव सूर्यो यस्य तस्मिंस्तथा ॥८६॥

तत्राऽनुतीरवनवासितपस्विविप्रा शिप्रा तवोर्मिभुजया[1] जलकेलिकाले ।
आलिङ्गनानि ददती भविता वयस्या हास्यानुबन्धरमणीयसरोरुहास्या ॥८७॥

तत्रा[ऽनुतीरवनेति] । तत्रोज्जयिन्यां शिप्रा नदी तव[2] जलकेलिकाले ऊर्मय एव भुजा तया आलिङ्गनानि ददती सती

1 B चित्तं विधि॰ 2 B add. अस्त्रैः 3 B भूरिणां 4 B वरिणां 5 B श्रुतिभिः 6 B पाठान्तरे ॥८५॥

1 B नृपते 2 B विश्रान्त॰ 3 B om. यौवतस्य; edt. add. यौवतस्य 4 B रूपा 5 B तमाला, edt. तमालमाला 6 B प्रकारः — ॥८६॥ 1 B + ex सरो॰ 2 B om.

तव —

वयस्या सखी भविता भविष्यति। किंभूता?। अनुतीरं वनेषु [3]वासिनस्तपस्विनो वानप्रस्था विप्रा यस्या सा तथा। पुनः किंभूता?। [4]हास्यस्य विकासस्याऽनुबन्धेन रमणीयं सरोरुहमेवाऽऽस्यं यस्याः सा तथा।[5]पक्षे, हसितम्। हास्यानुबन्धीत्यपि क्वचित्पाठः ॥८७॥

अस्याऽधिशय्य पुरमुज्जयिनीं भवानी जागर्ति या सुभगयौवतमौलिमाला।
पत्याऽर्धकायघटनाय मृगाक्षि! तस्याः शिष्या भविष्यसि चिरं वरिवस्ययाऽपि॥ ॥८८॥

अस्याऽधिशय्येति। अस्य राज्ञः पुरमुज्जयिनीम् [1]अधिशय्य आश्रित्य भवानी देवी पार्वती जागर्ति। या देवी सुभगस्य [यौ[2]वतस्य] युवतिसमूहस्य मौलिमाला मुकुररूपा। हे मृगाक्षि! त्वं तस्याः पार्वत्याः चिरं वरिवस्यया शिष्या भविष्यसि। किमर्थम्?। पत्या सह अर्धकायस्य घटनाय। अपीति सम्भावने। शिष्याऽपीति। अथवा घटनायाऽपीति भिन्नक्रमे वा। अथ च यथा देव्या ईश्वरेण श्रीमहाकालेन सार्धं शरीर[3]घटना वरिवस्यया कृता, तथा त्वम् [अपि] करिष्यसि। वरिवस्ययाऽपि भर्तृशुश्रूषयाऽपि छात्री भविष्यसि। यथा सा शुश्रूषां कुरुते, तथा त्वमपि कुरु। अन्तेवासी किल गुरुशीलमनुसरति।[4]"अधिशीङ्स्थासां कर्म" (पा० I. iv. 46) इति कर्मभूताधारत्वम्। इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् (पा० IV. i. 49)। नमोवरिवश्चित्रङः क्यच् (पा० III. i. 19)॥८८॥

निःशङ्कमङ्कुरिततां रतिवल्लभस्य देवः स्वचन्द्रकिरणामृतसेचनेन।
त्वाऽवलोक्य सुदृशां हृदयेषु कुर्वन्(?) देहदाहफलमाह स किं न विघ्नः॥८९॥

3 B वासित० M B हासस्य 5 R om. पक्षे ... पाठः ॥८७॥ 1 R अधिराज्य 2 B R om. यौवतस्य; edi. add. यौवतस्य 3 R ०घटनाय M R om. अधि० ... क्यच् ॥८८॥

निःशङ्कमिति]। तत्राऽवन्त्यां स देवो रुद्रः स्वस्य[1] चन्द्रकिरणामृतस्य सेचनेन [2]रतिवल्लभस्य [3]कामस्य निःशङ्कं सुदृशां हृदयेषु [4]अङ्कुरितताम् अवलोक्य तस्य कामस्य देहदाहस्य[5] फलं किमाह तद्वयं न विद्मः। यदि परमेश्वरेण कामो दग्धस्तत्कथं निजामृतेन कामिनीहृदयेषु पुनरुज्जीवितः ॥८९॥

---

आगःशतं विदधतोऽपि समिद्धकामा नाऽधीयते परुषमक्षरमस्य वामाः।
चान्द्रीव तत्र हरमौलिशयालुरेकाऽनध्यायहेतुतिथिकेतुरपैति लेखा[1] ॥९०॥

---

आगःशतमिति]। अस्य राज्ञः आगसाम् अपराधानां शतं विदधतोऽपि वामाः[2] स्त्रियः परुषम् अक्षरं न अधीयते अप्रियं न वदन्ति[3]। यतः [4]समिद्ध[:]कामो यासां तास्तथा। यतस्तत्रैका[5] चान्द्री लेखा न अपैति अपगच्छति। किंभूता?। हरस्य [6]मौलौ शयालुः सर्वदा स्थिता। किंभूता?। [7]अनध्यायहेतुर्या तिथिः शुक्लप्रतिपत् [शुक्लचतुर्दशी च]। [8]पञ्चदशकलपक्षे कृष्णचतुर्दशी। अथवा पञ्चदशकलश्चन्द्रः केषाञ्चिन्मतम्। श्रुतिस्मृति-पुराणज्योतिःशास्त्रे, 'दृष्ट्वा तु षोडशकलश्चन्द्रः ( ? )। तथा चाऽयमेव कविराह – यशःपादाङ्गुष्ठे (नै० )त्यादि। अन्त्यां कलां दर्श इवे( ? ) इति कालिदासः। अतोऽनध्यायहेतु[9]तिथिरमापास्या तस्यां कलामात्रशेषश्चन्द्रः। परे[10] न सा दृश्यतेऽतिक्षीणत्वात्, षोडशीकला मूलभूता तिष्ठति। तस्यां वृद्धिह्रासापेक्षया प्रतिपद्द्वितीयातृतीयाप्रभृतयस्तिथयः

---

1 B तस्य 2 B रमति॰ 3 P2 om. कामस्य 4 P2 अङ्कुरितां 5 B ॰दाहस्य — ॥८९॥
1 P2 + ?? रेखा 2 B रामाः 3 P2 ददन्ति 4 P2 समिद्धो 5 P2 ॰त्रैषा 6 P2 हर-मौलौ 7 P2 add. पञ्चदशकलश्चन्द्र इति दर्शने 8 P2 om. पञ्चदश॰.... चतुर्दशी 9 P2 अतिथिः 10 P2 परमा न ——

सर्ग ११ 48

पञ्चदशकला वर्द्धन्ते ह्रसन्ति च। तस्मादमावास्या एव तस्याः केतुः चिह्नम्। यत्र यत्र[11] [तिथौ] एका चन्द्रकला तत्र तत्राऽ[12]नध्यायः। ततश्च श्रीमहाकालशिरसि एका चन्द्रकला सदाऽस्ति। ततस्तासां[13] भर्त्तारं प्रति कठोरवचनेनाऽनध्यायः॥ ~~१०~~ १०[14]॥

---

भूपं व्यलोकत न दूरतरानुरक्तं सा कुण्डिनावनिपुरन्दरनन्दिनी[1] तम्।
अन्यानुरागविरसेन विलोकनाद्वा जानामि सम्यगविलोकनमेव रम्यम्॥११॥

---

भूपम् [इति]। सा कुण्डिनावनिपुरन्दरनन्दिनी[2] विदर्भेन्द्रपुत्री तं भूपं दूरतरम् अतितरामनुरक्तमपि न व्यलोकत। [वा] अथवा अन्यत्राऽनुरागवशेन [यो] विरसस्तेन[3] यत् विलोकनं तस्मात् सकाशात् सम्यक् यदविलोकनं तदेव रम्यं वरम् इत्यहं[4] जानामि॥११॥

---

भैमीङ्गितानि शिबिकाम्धरे वहन्तः साक्षान्न यद्यपि कथञ्चन जानते स्म।
ऊहुस्तथाऽपि सविधस्थितसम्मुखीनभूपालभूषणमणिप्रतिबिम्बितेन॥१२॥

---

भैमीङ्गितानीति[1]। अधरे इति सप्तम्येकवचनं प्रथमाबहुवचनं वा। अधरेऽधोभागे स्थिताः शिबिकां[2] वहन्तो जना यद्यपि भैम्या इङ्गितानि साक्षात् प्रत्यक्षं कथञ्चन [न] जानते स्म। तथाऽपि ते जन्याः सविधे समीपे स्थितो यः सम्मुखीनो[3] भूपालस्तस्य[4] भूषणेषु ये मणयः तेषां प्रतिबिम्बितेन[5] इङ्गितानि[6] ऊहुः वितर्कयामासुः। ऊह[7] इत्यर्थेऽपि वहिरिति

---

11 P2 कथम 12 P2 का तत्र 13 P2 कठोरवचने भर्त्तारं प्रति नध्यायः॥१०॥
~~1 P2 नन्दनी~~ नन्दनी 2 P2 नन्दनी 3 B यस 4 B प्रत्यहं ~~…~~ ॥११॥
1 P2 वचने 2 B शिरबिम्बां 3 B सम्मुखिनो 4 P2 भूपालाः 5 P2 प्रतिबिम्ब
6 B जहुः 7 B रित्यर्थे ———— ॥१२॥

सर्ग ११ 49

[कालन्त्रवृत्तिकारवचनात धातूनामनेकार्थत्वात । ऊह (691) वितर्के इत्यर्थे । वह (1073) प्रापणे इत्यस्य प्रयोगः । जहुरिति] केचित्पठन्ति । जग्मुरित्यन्ये ॥९२॥

---

भैमीमवापयत जन्यगणस्तदन्यं गङ्गामिव क्षितितलं रघुवंशदीपः ।
गाङ्गेयपीतकुचकुम्भयुगां च हारचूडासमागमवशेन विभूषितां च ॥९३॥ /स

---

भैमीं [मवापयतेति] । जन्यगणो भैमीं तस्मात्तास्सकाशात [अन्यं राजानम् अवापयत । यथा रघुवंशदीपो भगीरथः गङ्गां क्षितितलं निनाय । गाङ्गेयवत्] अथवा गाङ्गेयेन सुवर्णेन पीतवर्णौ कुचकुम्भयुगे यस्यास्तां तथा । [तथा] हारेण चूडया मुकुटेन च यः समागमः तद्वशेन विभूषितां गङ्गामपि । हारस्य श्रीमहादेवस्य याच्चूडा मुकुटं तत्समागमविशेषेन विभूषितां गङ्गाम् । अथवा विभौ ईश्वरे उषिताम् ॥९३॥

(7 गाङ्गेयेन भीष्मेण पीतौ स्वादितौ स्तनौ यस्यास्तथा ।)

---

तां मत्स्यलाञ्छनदराञ्चितचापभासा नीराजितभ्रुवमभाषत भाषितेशा ।
क्रीडाजडे ! किमपि सूचय चेतसा चेत क्रीडारसं वहसि गौडबिडौजसीह ॥९४॥

---

ताम [इति] । भाषितेशा भावती तामभाषत । किं भाषाम ! मत्स्यलाञ्छनस्य कामस्य दरम् ईषदञ्चितं वक्रं यच्चापं तस्य भासा नीराजिता भ्रूर्यस्याः सा तां तथा । हे क्रीडाजडे ! चेद्यदि इहाऽस्मिन गौडानां बिडौजसि इन्द्रे चेतसा क्रीडारसं वहसि तत्किमपि सूचय ॥९४॥

---

1 /2 + ९४ + ०गणस्तद० 2 /2 अवापयत 3 /2 om. ०कुम्भ० 4 /2 तस्याः 5 /2 हरेण 6 /2 ०षितं 7 /2 गाङ्गे० 8 /2 om. स्वादितौ 9 /2 हरस्य 10 /2 ०षितं — ॥९३॥

1 /2 यथापि 2 /2 चेतसा वहसि 3 /2 om. तत — ॥९४॥

सर्ग ११ 50

एतद्यशोभिरमलानि कुलानि भासां तस्य तुषारकिरणस्य तृणीकृतानि।
स्थाने ततो वसति तत्र सुधाम्बुसिन्धौ रङ्कुस्तदङ्कुरवनीकवलाभिलाषात्॥
॥९५॥

एतद्यशोभिरिति॥ एतत्तथ्यम्। एतस्य यशोभिः तुषार-।
किरणस्य-चन्द्रस्य अमलानि भासां कुलानि तृणीकृतानि। ततः स्थाने
युक्तं तत्र चन्द्रे रङ्कुर्मृगः वसति। किंभूते?। सुधा अमृतमेव आम्बु तेन
[1]सिन्धौ। कस्मात्?। तेषां कुलानां तृणानां या अङ्कुरवनी तस्याः
कवलाभिलाषात्॥९५॥

आलिङ्गितः कमलवत्करकस्त्वयाऽयं श्यामः सुमेरुशिखयेव नवः पयोदः।
कन्दर्पमूर्द्धरुहमण्डनचम्पकस्रग्दामत्वदङ्गरुचिकञ्चुकितश्चकास्तु॥९६॥

आलिङ्गित इति॥ अयं राजा श्यामवर्णः त्वयाऽऽ-
लिङ्गितः सन् चकास्तु। किंभूतः?। [1]रेखारूपकमलसंयुक्तौ करौ यस्य
स तथा। किंभूतः?। कन्दर्पस्य मूर्द्धरुहाणां [2]केशानां मण्डनं यत् चम्पकस्रग्दाम
तद्वद् या त्वदङ्गरुचिस्तया [3]कञ्चुकितो मिश्रितः। क इव?। नवः [4]पयोद इव।
यथा सुमेरुशिखया[5]ऽऽलिङ्गितो [6]नवः पयोदः शोभते। सोऽपि कमलम् उदकं
तत्संयुक्ताः करका उपला यत्र। मेघोऽपि करकाभिर्वर्षति, श्यामश्च॥९६॥

एतेन सम्मुखमिलत्करिकुम्भमुक्ताः कौक्षेयकाभिहतिभिर्विवशं विमुक्ताः। /भु
एतद्भुजोष्मभृशनिःसहया विकीर्णाः प्रस्वेदबिन्दव इवाऽरिनरेन्द्रलक्ष्म्या॥९७॥

एतेनेति॥ एतेन राज्ञा कौक्षेयकस्य खड्गस्याऽभि-

1 R2 सीधौ—॥९५॥ 1 R2 om. रेखारूप° 2 R2 om. मण्डनं 3 P2 °स्तया
4 R2 om. विसर्गः 5 R2 °शिखरया 6 R2 °लिङ्गितनव—॥९६॥

हेतिभिः कृत्वा विमुक्ताः अस्त्राः सम्मुखं मिलता कारिणा कुम्भस्थल मुक्ता मौक्तिकानि विबभुः [1] । कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेष्विति (पा० IV । ३ । ९६) ति ढकञ् । आयनेयी [2] (पा० VII । १ । २) इत्यादिना ढस्य एय् । उत्प्रेक्षते - अरिनरेन्द्राणां लक्ष्म्या [3] विकीर्णाः प्रस्वेदबिन्दव इव । किंभूतया ! एतस्य (१५१०) राज्ञो भुजयोरूष्मा बलं तत्र भृशं निःसहया [4] असमर्थया [5] ॥ ९७ ॥

आश्चर्यमस्य ककुभामवधीनवापदाजानुगाद्भुजयुगादुदितः प्रतापः ।
व्यापत्सदाशयविसारितसप्ततन्तुजन्मा चतुर्दश जगन्ति यशःपटश्च ॥ ९८ ॥

आश्चर्यमिति ]। एतदाश्चर्यम् । यदस्याऽऽजानुगात् [1] भुजयुगादुदितः [2] प्रतापः ककुभां दिशाम् अवधीन् पर्यन्तानवापत् [3] । यस्य किल पिता जानुपर्यन्तगमनेऽशक्तो नाधिकं तस्य पुत्रः । [4] किं वाऽस्य दिगन्तं कथं यातीति । किञ्च अस्य यश एव पटश्चतुर्दश जगन्ति व्यापत् । किंभूतः ? । सता शोभनेनाऽऽशयेन श्रद्धया विसारिता [ये सप्ततन्तवो यज्ञाः तेभ्यो जन्म यस्य स तथा । अथ च यः सदा सर्वदा शयेन हस्तेन विसारिता [5] ] विततास्सप्तसङ्ख्यास्तन्तवस्तेभ्यो जातः पटः [6] कथं भुवनानि आच्छादयतीति ॥ ९८ ॥

औदास्यसंविदवलम्बितमूकमुद्रामस्मिन् दृशोर्निपतितामवगम्य भैम्याः ।
स्वेनैव जन्यजनताऽन्यमजीगमत्तां सुष्ठु प्रतीक्षितविभावनमेव वाचः ॥ ९९ ॥

औदास्यसंविदिति ]। जन्यजनता स्वेनैव आत्मनैव ताम् अन्यं [राजानम् अजीगमत् । किं कृत्वा ? अस्मिन् राज्ञि विषये औदास्य-

1 R ०ग्रीवाभ्यो श्वा० 2 R ०नेयित्यादिना 3 R [struck-out word] विकीर्णाः 4 R ०सहायो 5 R ०मर्थयोः ॥ ९७ ॥ 1 R om. भुजयुगात् 2 B उदितः 3 B ०वापयत 4 R om. किं वाऽस्य 5 R विस्तारिता 6 B कथं — ॥ ९८ ॥

संविदा औदास्य[1]विन्यासेन[2] अवलम्बितां शून्यमुद्रां भैम्या] दृशोर्निपतिताम्[3] अवगम्य। केचित्तु[4]-आदस्यसंविदिति पुस्तकान्तरे पाठं[5] पश्यन्तो[6] व्याचक्षते। अमुष्मिन् राज्ञि विषये भवा आदस्या[7] या संवित् ज्ञानं तत्राऽवलम्बितां शून्यमुद्रां भैम्या दृशोः सम्बन्धिनीम् अमुष्मिन् राज्ञि निपतितामवगम्य। यद्वा राज्ञः संवित् शून्या दृष्टा इति नैसर्गिकम्। यदियं शून्यमुद्रा भैम्या दृशो-रस्मिन् राज्ञि[निपतिते। युक्तोऽयमर्थः। यतः स्फुटं विशेषसं भृत्यं प्रति इङ्गित-विज्ञापनमेव वाच्यः। न तु वक्तव्यं किमपि]॥९९॥

एतां कुमारनिपुणां पुनरप्यभाणीद्वाणी सरोजमुखि![1] निर्भरमारभस्व।
अस्मिन्नसङ्कुचितपङ्कजसख्यशिक्षानिष्णातदृष्टिपरिरम्भविजृम्भणानि॥१००॥

[एतामिति। वाणी एतां कुमारी चासौ[2] निपुणा च कुमार-निपुणा तां[3] पुनरपि अभाणीत्। कुमारश्रमणादिभिः[4] (पा० II. i. 70) इति निपुण-शब्देन स्त्रीलिङ्गः कुमारशब्दः समस्यते। तत्पुरुषश्च समासः। हे सरोजमुखि! त्वम्] अस्मिन् राज्ञि[5] असङ्कुचितस्य पङ्कजस्य सख्ये सादृश्यं तस्य शिक्षा [अभ्यासस्तत्र निष्णाता] कुशला या दृष्टिस्तस्याः परिरम्भस्य विजृम्भणानि निर्भरं नितराम् आरभस्व। निनदीभ्यां स्नातेः कौशले (पा० VIII. iii. 89) इति मूर्धन्यः॥१००॥

प्रत्यर्थिपार्थिवपयोनिधिमाथमन्थपृथ्वीधरः पृथुरयं मथुराधिनाथः।
अश्मश्रुजातमनुयाति न शर्वरीशः श्यामाङ्ककर्बुरवपुर्वदनाब्जमस्य॥१०१॥

1 P2 अस्य; edi. औदास्य० 2 P2 नस्तानेन 3 B निपततितां 4 P2 om. तु 5 P2 पाठः 6 B पश्यन्तो 7 P2 या: —॥९९॥ 1 P2 ०निर्झरमाभरस्व 2 P2 च सा 3 P2 om. तां 4 P2 ०श्रवणा० 5 B रास: —॥१००॥

प्रत्यर्थि[पार्थिवेति] । अथे पृथुर्नाम्ना मधुराधिनाथः [पृथ्वीधरो राजा] मधुरेति पाठः। (मथुरा मधुराकृतिरिव ? इति कालिदासः।) केचित्तु तस्यापि मधुरेति पठन्ति॥ किंभूत : ? प्रत्यर्थिनः पार्थिवा एव पयोनिधिस्तस्य माथो मथनं तत्र मन्थो वैशाखः पृथ्वीधरः पर्वतो मन्दरः अस्य वदनाब्जं शर्वरीशो नानुयाति। अश्मश्रुजातं श्मश्रुणः उत्पत्तिरहितम्। चन्द्रः किंभूतः? श्यामाङ्केन कलङ्केन कर्बुरवपुः ॥१०१॥

---

बालेऽधराधरितनैकविधप्रवाले! पाणौ जगद्विजयकार्मणमस्य पश्य।
ज्याघातजेन रिपुराजकधूमकेतुलारायमाणमुपरज्य मणिं किणेन ॥१०२॥

---

बाले[ऽधरेति] हे बालेऽधरेण [आ]धरिता नैकविधा प्रवाला यया तस्याः सम्बोधनम्। त्वम् उपरज्य रागं कृत्वा अस्य पाणौ मणिं पश्य। किंभूतम्? जातो विजयस्य कार्मणं वशीकरणम्। पुनः किंभूतम्? ज्याघाताज्जातेन किणेन रिपुराजकस्य धूमकेतुरूपा या तारा तद्वदाचरन्तम्। उपराग उपप्लवरूपः। (गोत्रोक्षोष्ट्रोरभ्रराजे (पा० ४।२।३९) त्यादिना कञ्।[युवोरनाकौ] (पा० ७।१।१) इति अकः।) धूमकेतुरपि पुच्छे कृष्णो भवति। मुखे दीप्तिमान्। किणेनोपरज्य संमृज्य। धूमकेतुलारायमाणमिति केचित् ॥१०२॥

---

1 R प्रत्यर्थीति। 2 R पृथुर्नाम्ना add. किंभूतः? 3 B R मधुरा०; edi. मथुरा० 4 R add. समीचीनः 5 R पठ शब्दभेददर्शनात् 6 R add. तथा च 7 B माथो 8 B मथनं 9 B मन्थौ 10 B वैशाखे 11 R om. पृथ्वी०...मन्दरः — ॥१०१॥
1 R उपरत्या 2 R किंभूतः? 3 B ०जात० 4 B किरणेन 5 R ०तारा 6 B ① किणेनो०... दीप्तिमान्; ② उपरागो... ०वित्यकः। 7 R om. ०रूपः॥ ॥१०२॥

एतद्भुजारणिसमुद्भवविक्रमाग्निचिह्नं धनुर्गुणकिणः खलु धूमलेखा।
जातं यया ऽरिपरिषन्मशकार्थया ऽश्रुविश्राणनाय रिपुदारदृगम्बुजेभ्यः॥१०३॥

---

एतत [इति] । खलु धनुर्गुणस्य किणो धूमलेखा । किंभूता? । एतस्य राज्ञो भुजावेवाऽरणी मन्थकाष्ठद्वयं ताभ्यां समुद्भवो यस्य विक्रमाग्निस्तस्य चिह्नं लिङ्गम् । धूमेनैव वह्निरनुमीयते । यया धूमलेखया रिपुदाराणां दृगम्बुजेभ्योऽश्रुविश्राणनाय जातम् । किंभूतया? । अरीणां परिषदेव मशकास्तन्निवृत्त्यर्थया । अर्थशब्दो निवृत्तिवचनः । धूमेन हि मशका निवर्त्तन्ते । बाष्पश्च भवति । सम्प्रदाने चतुर्थी ॥१०३॥

---

श्यामीकृतां मृगमदैरिव माथुरीणां धौतैः कलिन्दतनयामधिमध्यदेशम् ।
तत्राऽऽप्तकालियमहाह्रदनाभिशोभां रोमावलीमिव विलोकयितासि भूमेः ॥१०४॥

---

श्यामी[कृतामिति] । हे भैमि! त्वं तत्र मथुरायां कलिन्दपर्वतस्य तनयां यमुनां भूमेः पृथिव्या रोमावलीमिव विलोकयितासि । लुटि परस्मैपदे मध्यमैकवचनम् । (कालापके तु श्वस्तनी तासि (III.i.30)) । उत्प्रेक्षते - माथुरीणां मथुरानगर्या नारीणां मृगमदैः कस्तूरिकाभिः श्यामीकृतामिव । किंभूतैः? । जलकेलिकाले [धौतैः] प्रक्षालितैः । क[थाम्]? । मध्यदेशमधिकृत्य । हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः (मनु० म.२)॥ किंभूताम्? । आप्ता कालियस्य नागस्य महाह्रद एव नाभिस्तस्याः शोभा यया [ताम्] । रोमावली हि उदरदेशे

---

1 P एतद्भुजेति । 2 P °र्गुण° 3 P भूत: 4 P समुद्भवा 5 B °माग्ने° 6 B नैक; P धूमेन किल 7 B °रनुमी° 8 B °विश्राणे 9 B अरणी 10 P om. सम्प्रदाने चतुर्थी ॥१०३॥ 1 B P मधुरायां; edn. मथुरायां 2 B लुङि; P लुटि 3 P om. मथुरानगर्या नारीणां 4 B P om. धौतैः edn. add. धौतैः 5 B °मध्ये 6 B P om. तां edn. add. तां

नाभिसमीपे च शोभते[7] ॥१०४॥

गोवर्द्धनाचलकलापिचयप्रचारनिर्वासिताहिनि घने सुरभिप्रसूनैः।
तस्मिन्ननेन सह निर्विश निर्विशङ्कं वृन्दावने वनविहारकुतूहलानि ॥१०५॥

गोवर्द्धने[ति] । हे भैमि! त्वम् अनेन राज्ञा सह तस्मिन् प्रसिद्धे वृन्दावने निर्विशङ्कं[1] वनविहारस्य कुतूहलानि निर्विश उपभुङ्क्ष्व। किंभूते[2]? ॥ गोवर्द्धनाचलस्य ये कलापिनो मयू(51b)रास्तेषां चयस्य प्रचारेण निर्वासिता अहयः सर्पा यत्र तत्र तथा।[3] तथा सुरभिभिः प्रसूनैः पुष्पैर्घने गहने। मयूरैः किल सर्पा भक्ष्यन्ते।[4] सुरभिप्रसून इति पाठान्तरम् ॥१०५॥

भावी करः कररुहाङ्कुरकोरकोऽपि तद्वल्लिपल्लवचये तव सौख्यलक्ष्यः।
अन्तस्त्वदास्यहृतसारतुषारभानुशोभानुकारिकरिदन्तजकङ्कणाङ्कः ॥१०६॥

भावी[कर इति] । वृन्दावनमेव प्रक्रम्यते[1] । हे भैमि! तस्य वृन्दावनस्य वल्लीनां पल्लवस्य चये[2] मध्ये तव करः पुष्पावचयकाले सौख्येन[3] [लक्ष्यः] भावी भविष्यति । किंभूतः? ॥ कररुहाणां नखानाम् अङ्कुरा एव कोरका यत्र स तथाविधोऽपि।[4] पल्लवचयो हि कोरकयुतो भवति। अतितरां[5] पल्लवसदृशोऽपि। तर्हि कथमुपलक्षणीयः? ॥ अन्तर्मध्ये त्वदास्येन[6] हृतसारो[7] यस्तुषारभानुश्चन्द्रस्तस्य शोभानुकारीणि यानि करिणां दन्तेभ्यो जातानि कङ्कणानि तानि अङ्कश्चिह्नं यत्र स तथा। कङ्कणैर्लक्षित इत्यर्थः।[8] भविष्यति गम्यादयः (पा॰ III.iii.3) ॥१०६॥

7 P2 शोभति ॥१०४॥ 1 P2 निर्नि॰ 2 B भूतः 3 B मयूरैः ... भक्ष्यन्ते here. 4 P2 om. सुरभिः ... पाठान्तरम् ॥१०५॥ 1 P2 om. वृन्दा॰ ... प्रक्रम्यते 2 B चयः 3 P2 सौख्ये 4 P2 om. पल्लव॰ ... भवति 5 P2 om. तरां 6 B ॰दस्यैव 7 B धृत॰ 8 P2 om. भविष्यति गम्यादयः ॥ ॥१०६॥

सर्ग ११ 56

तज्जः श्रमाम्बु[1] सुरतान्तमुदा नितान्तमुत्कण्टके स्तनयुगे तव सञ्चरिष्णुः।
खञ्जन्प्रभञ्जनजनः पथिकः पिपासुः पाता कुरङ्गमदपङ्किलमप्यशङ्कम् ॥१०७॥

तज्ज [इति] प्रभञ्जनो वायुरेव जनः पथिकस्तस्मात् वृन्दावनात् जातस्तव श्रमाम्बु श्रम[जलं] पाता पास्यति। [किंभूतः?] स्तनयुगे सञ्चरिष्णुः। किंभूते? सुरतान्तस्य मुदा हर्षेण नितान्तम् उत्कण्टके रोमाञ्चिते। किं कुर्वन्? खञ्जन्[2] गतिभङ्गं प्राप्नुवन्। मन्द इत्यर्थः। तथा पिपासुः पातुमिच्छुः] किंभूतं जलम्? कुरङ्गमदेन [3]कस्तूरिकया पङ्किलमपि। कथम्? अशङ्कम्। यः किल पान्थः[4] कण्टकविषमे सञ्चरति, स खञ्जस्तृषाक्रान्तश्च पङ्किलमप्युदकं पिबति। प्रभञ्जयति यः सर्वान् सोऽपि खञ्जः॥१०७॥

पूजाविधौ मखभुजामुपयोगिनो ये विद्वत्कराः कमलनिर्मलकान्तिभाजः।
लक्ष्मीमनेन दधतेऽनुदिनं वितीर्णैस्ते हाटकैः स्फुटवराटकगौरगर्भाः ॥१०८॥

[1]पूजा[विधाविति]। ये विदुषां करा मखभुजां देवानां पूजाविधौ यज्ञे षोडशोपचारपूजायां वा उपयोगिनः कमलवन्निर्मलकान्तिभाजस्ते[2] कराः अनेन राज्ञा अनुदिनं वितीर्णैर्हाटकैः सुवर्णैर्लक्ष्मीं दधते। किंभूताः? स्फुटं वराटकवत् पद्मबीजकोशवत् गौरो गर्भो येषां ते तथा। अथवा वराटकाः कपर्दकाः ते गौरगर्भाः। कमलं किल देवपूजायामुपकुरुते। लक्ष्मीनिवासश्च पद्मबीजे[3]। [4]गौरगर्भे विदुषां करे[5] लोके न कपर्दमात्रं दीयते। अयं च सुवर्णं दत्ते ॥१०८॥

1 R+ext तज्ज 2 B R om. खञ्जन्; edn add. खञ्जन् 3 B कस्तूरिकाया।
4 B पन्था; R पाथः; edn ~~[illegible]~~ पान्थः —॥१०७॥
1 R पूजेति। 2 R om. विसर्गः 3 B न्बीजेश्च 4 B R गौरमग्रे; edn गौरगर्भे
5 B करे ——॥१०८॥

वैरिश्रियः[1] प्रतिनियुद्धमनाप्नुवन्यः किञ्चिन्न तृप्यति धरावलयैकवीरः।
स त्वामवाप्य निपतन्मदनेषुवृन्दस्यन्दीनि तृप्यतु मधूनि पिबन्निवायम् ॥१०९॥

---

वैरि[2][श्रिय इति] ।[3]सोऽयं नृपस्त्वामे[4][वा]वाप्य मधूनि पिबन्निव तृप्यतु। किंभूतानि? [नि]पतत् यन्मद[नो]स्य इषुवृन्दं तस्मात् स्यन्दीनि स्रवन्ति। मदनस्य हि बाणवृ[5]न्दे मकरन्दे[नि] भाव्यम्। [6]यो धरावलयस्य [एको]वीरो [7]वैरिणां श्रियो लक्ष्म्याः किञ्चित् प्रतिपक्षस्य नियुद्धम् अनाप्नुवन् न तृप्यति। [8][वैरि]श्रियं प्रतीति पा[9]ठे वैरिलक्ष्मीं [10]प्रति किञ्चिन्न तृप्यतीति[11] व्याख्येयम् ॥१०९॥

---

तस्मादियं क्षितिपतिक्रमगम्यमानमध्वानमैक्षत नृपादवतारिताक्षी।
तद्भावबोधबुधतां निजचेष्टयैव व्याचक्षते स्म शिबिकानयने नियुक्ताः ॥११०॥

---

तस्मा[दिति] ।इयं तस्मान्नृपादवतारिते व्यावर्तिते[1] अक्षिणी यया एवंविधा सती क्षितिपतिक्रमेण गम्यमानमध्वा[2]नमैक्षत। तथा शिबिकाया नयने नियुक्ताः पुरुषाः तस्या भावस्य चित्तस्य बोधे ज्ञाने बुधतां विद्वत्तां निजचेष्टया एव गमनेनैव व्याचक्षते स्म ॥११०॥

---

भूयोऽपि भूपमपरं प्रति भारती तां त्रस्यत्कुरङ्गचलचक्षुषमाचचक्षे।
एतस्य काशिनृपतेस्त्वमवेक्ष्य लक्ष्मीमक्ष्णोः सुखं जनय खञ्जनमञ्जुनेत्रे ॥१११॥

---

भूयो[ऽपीति] ।भारती[1] [भूयोऽपि][2] पुनरपि अपरं भूपं प्रति तामाचचक्षे। किंभूताम्? त्रस्यत[3]श्चमूरो मृगस्येव चले चक्षुषी यस्याः–

---

1 P2 + ex. न्श्रियं 2 P2 वैरीति। 3 B सोऽयं ... भाव्यम् aft. व्याख्येयम् 4 B °त्वमे°; P2 om. एव 5 P2°वृन्दः 6 P2 ये 7 B वैरीणां 8 B वैरि° ... पाठे 9 B पाठान्तरम् 10 P2 न्श्रियं 11 B वा — ॥१०९॥ 1 B यस्या 2 P2 om. अध्वानम् — ॥११०॥ 1 P2 तां here.
2 B P2 om. भूयोऽपि; corr. add. भूयोऽपि
3 B °श्चमूरा — ॥१११॥

सर्ग ११ 58

स्तो तथा । हे खञ्जनवन्मञ्जुनेत्रे ! त्वम् एतस्य काश्या वाराणस्या नृपते - र्देवी भव इयाऽऽशोः सुखं जनय ॥१११॥

एतस्य साऽवनिभुजः कुलराजधानी काशी भवोत्तरणधर्मतरिः स्मरारेः ।
यामागता दुरितपूरितचेतसोऽपि पापं निरस्य चिरजं विरजीभवन्ति ॥११२॥

एतस्य[1] [इति] । सा काशी वाराणसी एतस्य अवनिभुजः कुलराजधानी । किंभूता ? । स्मरारेः श्रीमहादेवस्य भवस्य संसार[3]स्यो[4]त्तरणार्थं धर्मतरिर्धर्मबेडा । यां नगरीम् आ[5]गताः सन्तो दुरितेन [6]पूरितचेतसोऽपि । नविकलवचेतस इति [7]पाठान्तरे विकलवचेतसोऽपि [8] चिराज्जातं पापं निरस्य विरजीभवन्ति । रजोगुणरहिता भवन्ति । अभूततद्भावे (पा॰ V.iv.50) [इति] च्विः । अरुमन (पा॰ V.iv.51) इत्यादिना सलोपः ॥११२[9]॥

आलोच्य भाविविधिकर्तृकलोककृच्छ्राणि रोदिति पुरा कृपयैव रुद्रः ।
नामेच्छयेति निमिषमात्रमधत्त यत्तां संसारता[1]रणतरीमसृजत्पुरीं सः ॥११३॥

[2]आलोच्य [इति] । पुरा रुद्रः कृपया [एव] रो[3]दिति रुदितवान् । किं कृत्वा ? । [4]भाविनि विधिकर्तृकाणि दैवसम्भवानि लोकानां कृच्छ्राणि [5]आलोच्य नामेच्छया अरोदीत् इति श्रुतौ य[6]द्विधत्ते तन्निमिषमात्रमधत्त[7] यत्तां संसारतारणार्थं [[8]तरीं] तापं पुरीं वाराणसीं [सः] अस्जत [9]तथा च श्रुतिः - (160 a) सोऽरोदीत् यदरोदीत्[10] तद्रुद्रस्य रुद्रत्वम् (  ) । तथा

1 P2 एतस्येति । 2 B काशी; P2 कासी 3 B संसारोत्त॰ 4 P2 त्तारणा॰ 5 P2 आगताः
6 P2 दुरित॰ 7 P2 पाठे 8 P2 add. नरा 9 B 102. — ॥११२॥ 1 P2 text ॰सागर॰
2 P2 आलोच्येति । 3 B रोदति 4 P2 भावीनि 5 P2 आलोक 6 B ॰धत्ते 7 P2 om. यत
8 P2 om. तरीं 9 P2 तेषां 10 P2 om. यदरोदीत्

-च उषासम्भरणकाण्डे शातपथी श्रुतिः - स संवत्सरे कुमारोऽजायत। सोऽ-
रोदीत्। तं प्रजापतिरब्रवीत्। कुमार! किं रोदिषि? यच्छ्रमात्तपसोऽधिजातोऽ-
सीति। सोऽब्रवीदनपहतपाप्मा वा अस्म्यहितनामा। [12]नाम मे धेहीति। तस्मात्
पुत्रस्य जातस्य नाम कुर्यात् पाप्मानमेवाऽस्य तदपहन्त्यपि द्वितीयमपि तृतीय-
मभि पूर्वमेवाऽस्य तत्पाप्मानमपहन्ति। तमब्रवीद्रुद्रोऽसीति। ( ? )॥

---

तथा श्रीभागवते [13]तृतीये स्कन्धे द्वादशाध्याये
[14]तामिस्रादिसर्गं दर्शयित्वा [स्थाननाम] वर्णितम्। [15]दृष्ट्वा पापीयसीं सृष्टिं
[16]नात्मानं बह्वमन्यत। भगवद्ध्यानपूतेन मनसाऽन्यांस्ततोऽसृजत॥३॥
सनकं च सनन्दं च सनातनमथाऽऽत्मभूः। सनत्कुमारं च मुनीन्निष्क्रिया-
नूर्ध्वरेतसः॥४॥ तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः!। तन्नैच्छन्
मोक्षधर्माणो वासुदेवपरायणाः॥५॥ सोऽवध्यातः [17]सुतैरेवं प्रत्याख्याता-
नुशासनैः। क्रोधं दुर्विषहं जातं नियन्तुमुपचक्रमे॥६॥ धिया निगृह्यमाणोऽपि
भ्रुवोर्मध्यात् प्रजापतेः। सद्योऽ[18]जायत तन्मन्युः कुमारो नीललोहितः॥७॥ स
वै रुरोद देवानां पूर्वजो भगवान् भवः। नामानि कुरु मे [19]धातः! स्थानानि
च जगद्गुरो!॥८॥ इति तस्य वचः [20]पाद्मो भगवान् [21]परिपालयन्। अभ्यधाद्
भद्रया वाचा मा [22]रोदीस्तत्करोमि ते॥९॥ यदरोदीः [23]सुरश्रेष्ठ! सोद्वेग इव
बालकः। ततस्त्वामभि[24]धास्यन्ति नाम्ना रुद्र इति प्रजाः॥१०॥ [25]हृदिन्द्रियाण्य-
सुर्व्यो[26]म वायुरग्निर्जलं मही। सूर्यश्चन्द्रस्तपश्चैव स्थानान्यग्रेऽ[27]कृतानि ते॥११॥
मन्युर्मनुर्महान् [28]सोमो महा[29]ञ्छिव ऋतध्वजः। [30]उग्ररेता भवः कालो वामदेवो

---

11 P2 ०जायते 12 P2 नाम धीहिति; 13 P2 तृतीये... वर्णितम् om. धृतव्रतः 14 P2 om. तामिस्रादिसर्गं दर्शयित्वा 15 P2 om. दृष्ट्वा पापी०... नीललोहितः॥७॥ 16 B ०मात्मानं 17 B सुरै० 18 B ०जयेत 19 B नातः; P2 om. विसर्गः 20 B पद्मो 21 P2 ०पालयेत् 22 B ह्याद्य० 23 B सुराः; P2 ०श्रेष्ठो 24 P2 ०धास्यं 25 P2 इतीन्द्रियाण्यमुच्च्योमि 26 B ०भ्येमि 27 B ०कृतानि 28 P2 असौ 29 P2 ०शिरे 30 B उररेता; P2 उग्र०

धृतव्रतः ॥ १२ ॥ [31] धीवृत्तिरिम्म[32]सोमा च नियुत्[33]सर्पिरिलाम्बिका । इरावती सुधा
दीक्षा रुद्राण्यो रुद्र ! ते स्त्रियः ॥ १३ ॥ गृहाणैतानि नामानि स्थानानि च
सयोषणः । एभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः ॥ १४ ॥ इत्यादिष्टः स /सि
गुरुणा भगवान्नीललोहितः ॥ १५ ॥ आत्मेच्छयेति केचित् पठन्ति । आत्मन
इच्छया अरोदीदिति [अत्र] व्याचक्षते । क्वचित्तु[34] नात्मेच्छयेति पाठे काक्वा[35] /मे
व्याख्येयम् । किं न [36] मिषमात्रम् अधत्त । अपि तु अधत्त ॥ ११३[37] ॥

वाराणसी निविशते न वसुन्धरायां तत्र स्थितिर्मखभुजां भुवने निवासः ।
तत्तीर्थमुक्तवपुषामत एव मुक्तिः स्वर्गात्परं पदमुदेतु मुदे तु कीदृक् ॥ ११४ ॥

वाराणसीति] । वाराणसी वसुन्धरायां न निविशते[1] ।
किन्तु तत्र तस्यां स्थितिः मखभुजां [देवानां] भुवने स्वर्गे निवासः । अत एव
तस्यास्तीर्थेषु विशिष्टेषु मणिकर्णिकादिषु मुक्तवपुषां प्राणिनां मुक्तिर्मोक्षः ।
तु यस्मात् स्वर्गात् परं पदं मुदे महानन्दाय कीदृगुदेतु । मोक्ष एव स्वर्गादधिकः ॥ ११४ ॥

सायुज्यमृच्छति भवस्य भवाब्धियादस्तां पत्युरेत्य नगरीं नगराजपुत्र्याः ।
भूताभिधानपटुमेधतनीमवाप्य भीमोद्भवे ! भवति भावमिवाऽस्ति धातुः ॥ ११५ ॥

सायुज्य[मिति] । हे भीमोद्भवे ! [1] तां नगराजपुत्र्याः
पत्युर्नगरीम् एत्य भवाब्धौ संसारे यादो जलचरः संसारी भवस्येश्वरस्य
सायुज्यं मुक्तिमृच्छति । किंभूताम् ? । भूतानां पिशाचादिगणानाम् अभिधानैः –
नामभिः पटुं[2] बहुलाम् । भूतपतित्वात् परमेश्वरस्य । अथवा अभिपूर्वो धाञ् (॥67) –

31 R add इति ; and om. धीवृत्ति॰ .... नीललोहितः । 32 B धर्तन्वीर॰ 33 B नियस॰
34 R om. तु 35 R काका 36 R मिषमात्रं न 37 B 103 – ॥ ११३ ॥ 1 B निवसते – ॥ ११४ ॥
1 R om. तां 2 B परं

धातुर्बन्धने वर्तते। तथा च पाणिनेर्द्वितीयाध्याये[3]ऽपि [4]तृतीयपादे प्रथमसूत्रे अनभिहित (पा° II.iii.1) इत्यत्र पदमञ्जरीकारेण व(160b)र्णितम् - [5]अनभिहित-शब्दोऽयमनेकार्थः। तथा हि अभिपूर्वस्य दधाते[6]र्हिनोतेश्चैतद्रूपं सम्भवति। अभिपूर्वश्च दधातिर्बन्धनेऽपि दृष्टः। अश्वाभिधानीमादत्ते इति। उच्चारणेऽप्यभिहितः श्लोकः इति। प्रतिपादनेऽप्य[भि]हितोऽर्थ इति। हिनोतिरपि वृद्धौ [7]गतौ च वर्तते। इह तु वक्ष्यमाणानां कर्मादीनां बन्धनाद्यर्थचतुष्टयासम्भवात् प्रतिपादन[8]वचनोऽभिहितशब्दः इत्याह। अनभिहिते [9]अनिर्दिष्टे [अनुक्ते] इति॥ तथा च श्रुतिः [10]इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते (तै°सं° V.12) इत्यत्राश्वबन्धनी रज्जुः। शाङ्खायनसूत्रे [11]महावीराभिष्टवे, अभि त्वा देव सवितरि(—)त्यभिधीयमानायाम् (III.xiii.17) इति [12]सत्रबध्यमानायां गवि इति [13]भाष्यकारेण व्याकृतम्। बध्यमानायामभि त्वेति ऋचमभिष्टौती-त्यर्थः। भूतानां प्राणिनाम् अभिधाने संसारबन्धने [अतिपटुम्] अपनेत्रीम्। यथा अस्विधारधरनी विथक्तिमवाप्य भवतिभावं भूरादेशमृच्छति। किंभूताम्?। भूताभिधानोपटुम्। अतीतकालविहितत्वात् ॥११५॥

---

निर्विश्य निर्विरति काशिनिवासि भोगं निर्माय नर्म च मिथो मिथुनं यथेच्छम्।
गौरीगिरीशघटनाधिकमेकभावं शर्मोर्मिकञ्चुकितमञ्चति पञ्चतायाम् ॥११६॥

---

[निर्विश्ये[1]ति]। मिथुनं स्त्रीपुंसयुग्मं काश्यां वाराणस्यां [2]निवासि निवासपरं युग्मं भोगं निर्विरति अनवरतं निर्विश्य भुक्त्वा। तथा मिथो यथेच्छं नर्म परिहासक्रीडां च निर्माय पश्चादन्ते पञ्चतायां सत्याम् एकभावमञ्चति। किंभूतमैक्यम्?। गौर्या [3]गिरीशस्य च या घटना तस्या अ[4]भि पि

---

3 B °याध्यायतृतीयपाद° 4 B द्वितीय° 5 B om. अनभिहित°...°निर्दिष्टे इति। 6 B °र्धिनो° 7 B om. 8 B वचनाभिहित° 9 B उक्ते निर्दिष्टे 10 B add. अपि 11 B महाभिष्टवे 12 B om. सत्र° 13 B भाष्यकारेण इति —॥११५॥ 1 B निर्विशा° 2 B वासि 3 B गिरिश° 4 B अभि—

सकाशात् अधिकम्। यथाऽर्धनारीश्वरस्यैक्यं ततोऽप्यधिकम्। तथा शर्मणः[5] सुखस्योर्मिभिः[6] कञ्चुकितं मुक्तिपदत्वात्। अथवा गौर्यां स्त्रियां घटना पुंसि[7] ईश्वरे गिरीशो[8] घटना तया अधिकम् उत्कृष्टम्। यस्य किल पञ्चभाव-स्तस्य कथमेकसङ्ख्यात्वम् इति विरोधाभासः ॥११६॥

---

न श्रद्दधासि यदि तन्मम मौनमस्तु कथ्या निजाप्ततमयैव तवानुभूत्या।
न स्यात् कनीयसितरा यदि नाम काश्या राजन्वती मुदिरमण्डनधन्वना भूः ॥११७॥

---

न श्रद्[धासीति] । हे भैमि! यदि त्वं न श्रद्दधासि न[1] प्रत्येषि, तन्मम मौनमस्तु। तव निजेन आत्मना[2] आप्ततमया अनुभूत्या [अनु]-भवेनैव[3] [कथा] कथ्यां[4] स्वयमेव ज्ञास्यसि। अथवाऽऽप्ततमस्य[5] वाक्येन प्रतीति-र्भवत्येव[6]। का प्रतीतिरित्याह - यदि मुदिराणां मेघानां मण्डनं धनुः[7] इन्द्रधनु-र्यस्य तेन इन्द्रेण देवराजेन[8] राजन्वती[9] [10]सौराज्यवती भूर्भूमिः[11] स्वर्गलक्षणा। [नाम अभ्युपगमे। काश्या वाराणस्या कनीयसितरा अत्यल्पा न स्यात्]। घरूप-[12] कल्पचेलड्ब्रुवो गोत्रमतहृतेषु ङ्योऽनेकाचो ह्रस्व (पा० VI. iii. 43) इति ह्रस्वः। तरप्तमपौ घः (पा० I. i. 22)। राजन्वान् सौराज्ये (पा० VIII. ii. 14)[13]। कथ्येति भू-रित्यस्य विशेषणं [वा] ॥११७॥

---

सानाधिकाऽसि सुकृतान्यधिकाशि कुर्याः काय किमन्यकथनैरपि यत्र मृत्योः।
एकं जनाय सततामियपानमन्यधन्ये! वहत्यमृतसत्रमवारितार्थि ॥११८॥

---

5 B °मासस्वर° 6 P2 add. आनन्दस्य 7 P2 पुंस 8 B गिरिश° — ॥११६॥
1 P2 प्रत्येषि न 2 P2 आत्मना twice 3 P2 ष 4 B कथा 5 P2 अथ च
6 P2 °र्भवे 7 P2 धन्व 8 P2 om. देवराजेन 9 B °न्वता 10 P2 सौराज्ये राज्य°
11 P2 om. भूमिः 12 B नमो ध्यपगमे कापो ह्रस्व इति ह्रस्वः। 13 B परा-जयते — ॥११७॥

सर्ग ११ 63

[स्नानाधिकेति] । त्वं स्नानेनाऽधिकाऽस्य[1]धिकाशि वारा-णस्यां सुकृतानि कुर्याः । अन्यैः कथनैः किं कार्यं यत्र हे धन्ये! जनाय मृत्यो-[2]ऽपि सकाशात् सततम[3]भयदानम् अमृतस्य सत्रं मुक्तिलक्षणम् एकं वहति । अन्यच्च अमृतस्य अन्नस्य [4]अयाचितस्य [5]सत्रं [वि]हति । [किंभूतम्?] अवा-रिता अर्थिनो यत्र तत्तथा ॥११८॥

भूभर्तुरस्य रतिरेधि मृगाक्षि! मूर्ता सोऽयं तवाऽस्तु कुसुमायुध एव मूर्तः । भातं च ताविव युवां गिरिशं विराद्धमाराद्धुमारु पुरि तत्र कृता[1]वतारौ ॥११९॥/व

भूभर्तुरिति] । त्वम् अस्य भूभर्तुर्मू[2]र्ता रतिरेधि भव । हे मृगाक्षि! सोऽयं राजा तव मूर्तः[3,6] कुसुमायुध एवाऽस्तु । तत्र पुरि गिरिशम् आराद्धुम् आरु कृता[4]वतारावि[ति]च तौ रतिकामौ यथा, तथा युवां [5]भातं शोभे[6]ताम् । किंभूतम् ईश्वरम्? [7]पुरा विरोद्धम् अपराद्धम् । उत्प्रेक्षा[यां] वा ॥११९॥

कामानुशासनशते सुतरामधीती सोऽयं रहो नखपदैर्महतु स्तनौ ते । रुष्टाद्रिजाचरणकुङ्कुमरे[पङ्क]णसङ्कीर्णशङ्करशशाङ्ककलाङ्क[1]कारैः ॥१२०॥

कामानु[शासनेति] । सोऽयं राजा [ते[2]] तव स्तनौ रहो नखपदैर्महतु पूजयतु । किंभूत(त)(व)ैः? रुष्टाया[3] अद्रिजायाश्चरण-कुङ्कुमपङ्कस्य रागेण प्रेमभवरात् सङ्कीर्णा मिश्रिता या शङ्क[4]रस्य /णा

1 B अभय° 2 B मृतो° 3 R अय° 4 R om. अयाचितस्य 5 B सर्वत्र —॥११८॥
1 R+ext कृता° 2 B मूर्च्छा 3 R मूर्तेः 4 R ताराविच तिकामौ 5 R भावं च
6 B शोभन्ताम् 7 R om. पुरा —॥११९॥
1 R+ext कलापैः 2 B R om. ते; edd. add. ते 3 B काष्ठाया 4 R om. शङ्करस्य —

शशाङ्ककान्त्या तस्याः अङ्ककारैः[5] सदृशैः। बुधिराकृत्वात् नखानाम्। किं भूतोऽयम्?। कामानुशासनस्य कामशास्त्रस्य शते सुतराम् अधीती अध्ययनशीलः[6]। सप्तम्यधिकरणे च (पा० II. iii. 36) इत्यत्र, क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम् (वा० 160)॥१२०॥

---

पृथ्वीश एव नुदतु त्वदनङ्गतापमालिङ्ग्य कीर्तिचयचामरचारुचापः।
सङ्ग्रामसङ्गतविरोधिशिरोधिदण्डखण्डिक्षुरप्रशरसम्प्रसरत्प्रतापः॥१२१॥

---

पृथ्वीश इति]। एष पृथ्वीश आलिङ्ग्य तवाऽनङ्ग[1]-तापं नुदतु। किं भूतः?। कीर्तिचय एव चामरं तेन चारु चापं यस्य स तथा[2]। तथा सङ्ग्रामे सङ्गतानां विरोधिनां शिरोधिदण्डा ग्रीवास्तेषां [खण्डिनः[3]] खण्डनशीला ये क्षुरप्राः[4] शरास्तैः सम्प्रसरन्[5] प्रतापो यस्य स तथा॥१२१[6]॥ [२

---

वक्षस्त्वदुग्रविरहादपि नाऽस्य दीर्णं वज्रायते पतनकुण्ठितशत्रुशस्त्रम्।
तत्कन्दकन्दलतया भुजयोर्न तेजो वह्निर्नमत्यरिवधूनयनाम्बुनाऽपि॥१२२॥

---

वक्ष[1] [इति]। अस्य वक्षो यत्तव उग्राद्विरहादपि न दीर्णम्। अतो[2] [वज्रायते[3]] वज्रमिवाचरति। किं भूतम्?। पतनेन[4] कुण्ठितानि[5] शत्रूणां शस्त्राणि यत्र तत्तथा। किञ्च भुजयोस्तेज एव वह्निः अरिवधूनां नयनाम्बुनाऽपि न नमति। कया?। तस्य[6] वज्ररूपस्य वक्षसः य:] कन्दस्तस्य[7]

---

5 B अङ्कः 6 R om. अध्ययनशीलः —॥१२०॥

1 R नलिङ्गानपापदलु 2 B तत्तथा 3 BR om. खण्डिनः; edr. add. खण्डिनः 4 R om. विसर्गः 5 B तत्तथा 6 B २१. —॥१२१॥

1 R वक्षस्त्वदिति। 2 B R यत्तो 3 BR om. वज्रायते; edr. add. वज्रायते 4 B पतितेन 5 B कुण्ठि० 6 B तदेव वक्ष, एव 7 R कण्ठ०

कन्दलितेया [अङ्कुरतया । भुजयोर्हि वक्षे[8] कन्दादुसन्ति: । वज्रमभेद्यमच्छेद्यं वा ॥१२२॥

किं न द्रुमा जगति जाग्रति लक्षसङ्ख्यास्तुल्योपनीतपिककाकफलोपभोगाः ।
स्तुत्यस्तु कल्पविटपी[1] फलसम्प्रदानं कुर्वन् स एव विबुधानमृतैकवृत्तीन् ॥१२३॥

किं न द्रुमा इति । किं] [2] जगति लक्षसङ्ख्या द्रुमा न जाग्रति? किंभूताः? [3] तुल्य उपनीतः पिकानां कोकिलानां [काकानां[4]]च फलोपभोगा यैस्तैः तथा । तु पुनः स एव कल्पविटपी स्तुत्यः । किं कुर्वन्? अमृतमेकमेव वृत्तिर्येषां तान् विबुधान् फलानां सम्प्रदानभूतान् कुर्वन् । देवाः कल्पवृक्षफलान्युपभुञ्जते । अथ च विबुधान् विदुषो मृतं स्याद्[5]याचितम् (मनु० IV. ५) तदेकवृत्तीन् एकवृत्तिपरान्[6] दानपात्रीकुर्वन् । अत्र अप्रस्तुतप्रशंसायां पूर्वार्द्धे सादृश्यमात्रम् । उत्तरार्द्धे तु समासोक्तिः । तुल्ये प्रस्तुते तुल्यान्तरस्याऽऽक्षेपहेतुः । इयं वाच्ये प्रतीयमानार्थाऽध्यारोपेण ॥१२३॥

अस्मै करं प्रवितरन्तु नृपा न कस्मादस्यैव तत्र यदभूत् प्रतिभूः कृपाणः ।
दैवाद्यदा प्रवितरन्ति न ते तदैव नेदंकृपा निजकृपाणकरग्रहाय ॥१२४॥

अस्मै [करमिति] । अस्मै [1] राज्ञे नृपाः [राजानः] कस्मात् करं दण्डं न [2] [प्रवितरन्तु] प्रयच्छन्तु । यत् तत्र करप्रदाने [3] अस्यैव कृपाणः प्रतिभूरभूत् । यदा [दैवात्[4]] दैववशात् ते राजानः करं दण्डं[5] न प्रवितरन्ति तदा एवं[6] निजकृपाणः करग्रहाय न इदंकृपा[7] अस्य कृपा । प्रतिभुवः पार्श्वात्

८ B add. तत् —॥१२२॥ १ I2 read फलं २ B जगति om. द्रुमा ३ B तुला ४ BI2 om. काकानां; edi. add. काकानां ५ B स्यचदाचितं ६ I2 om. एकवृत्तिपरान् —॥१२३॥
१ I2 om. राज्ञे २ BI2 om. प्रवितरन्तु; edi. add. प्रवितरन्तु ३ I2 om. ग्रहणे ४ BI2 om. दैवात्; edi. add. दैवात् ५ I2 om. दण्डं ६ I2 एव ७ BI2 अस्य कृपा इदंकृपा

करो गृह्यते। अथ च निजस्य कृपाणस्य करे हस्ते गृहाय न कृपा। [8]परि-
गृहायेति पाठान्तरम् ॥१२४॥

एतद्बलैः क्षणिकतामपि भूखुराग्रस्पर्शायुषां रयरसादसमापयद्भिः।
दृश्यैकपेयकेवलनभःक्रमणप्रवाहैर्वाहैरलुप्यत सहस्रदृगर्वगर्वः ॥ १२५॥ /ग

[1]एतद् [बलैरिति] । एतस्य बलैः सैन्यैर्वाहैरश्वैः सहस्र-
दृशो महेन्द्रस्य [2]अर्वण उच्चैःश्रवसो बहुवचनेन वा विग्रहः, अर्वणामुच्चैः-
श्रवःप्रभृतीनां [3]गर्वोऽलुप्यत। छन्दसि त्रादेशः। तथा च वार्त्तिकम् [4]अर्वणस्तृ
मघोनश्च न शिष्यम्छान्दसं हि तत् ( ) । अतो भाषायां त्रादेशाभावः। [6]तथा
च- कुर्वन्नर्वस्वरोद्भूतौ ( ) इत्यादिप्रयोगः। सौ च (पा० VI.iv.13)। [5]हरि
मघवानित्यत्र विजयानन्दः। छान्दसौ एतौ प्रयोगौ इति नागनायकः प्राह। /प्रा
अये तु भगवान् महेश्वरलनयप्रसादान्मोहान्धकारभिदुरशब्दब्रह्मणि
निष्णातो लौकिकावपीति मनुते ~~स्म~~ ( ) इति। किम्भूतैः? दृश्या
दृष्ट्या पेयो दृश्यः केवलो नभःक्रमणस्याऽऽकाशस्योत्प्लवनस्य प्रवाहो
नैरन्तर्यं येषां तैस्तथा। किं कुर्वद्भिः? रयस्य वेगस्य रसात् (1616) [7]भुवः
पृथिव्याः खुराग्रैः यः [8]स्पर्शस्तस्यायुषां [9]जीवितानां क्षणिकतामपि [10]असमा-
पयद्भिः। [11]क्षणमपि खुराणां भूस्पर्शो न भवति ॥१२५॥

तद्वर्णनासमय एव समेतलोकशोभावलोकनपरा तमसौ निरासे।
मानीतया गुणविदा यदनादृतोऽसौ तद्भूभृता सदसि दुर्यशसेव मम्लौ ॥१२६॥

8 B om. परिगृहायेति पाठान्तरम् ॥१२४॥
1 B एतत्। 2 B2 om. अर्वण ... विग्रहः 3 B गन्धर्वो लुप्यते 4 B6 स्तु 5 B2
शिष्यं 6 B2 om. तथा च ... मनुते इति। 7 B भुवि 8 B यः 9 B तथा॰ 10 B
असमाप्रापय॰ ॥ B6 ——॥१२५॥

[1]तद्व[र्णनेति] । असौ दमयन्ती तस्य वर्णनासमय एव समेतस्य लोकस्य शोभाया अवलोकनपरा सती तं राजानं [2]निरासे इति [3]निसमुपविभ्यो ह्वः (पा० I.iii.30) इत्यत्र, उपसर्गादस्यत्यूह्योर्वा वचनम् (वा० 624) । असौ मानी तया गुणज्ञया चन्दनाहृतः तत्तस्मात् भूभृतां राज्ञां सदसि [4]असौ दुर्यशसा [5]इव [6]अकीर्त्यैव । दुर्यशसैव इति पाठान्तरम् । [7]मम्लौ म्लानिमाजगाम । [8][9]ईम्म्ले इति क्वचित्पाठे तेन [10]मम्ले इति व्याचक्षते ॥[11]१२६॥

---

सानन्तानाप्य तेजःसखनिखिलमरुत्पार्थिवान् दिष्टभाजः
श्चित्तेनाऽऽशाजुषस्तान् सममसमगुणान् मुञ्चती गूढभावा ।
पारेवाग्वर्तिरूपं पुरुषमनु चिदम्भोधिमेकं शुभाङ्गी
निःसीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः ॥१२७॥ 18

---

[1]साऽऽनन्ता[निति] । सा दमयन्ती उपनिषदुपमा उपनिषत्सदृशी आसीत् । किं कृत्वा ? एकमेव पुरुषं नलम् अनु लक्षीकृत्य भूयो वारंवारं [2]तत्परीभूय । किंभूतम् ? पारेवाग्वर्ति वचनागोचरं [रूपं] यस्य तं तथा । चिदम्भोधिं चिद्रूपमित्यर्थः । किंभूता ? शुभाङ्गी । किंभूतम् ? [3]निःसीमा आनन्दो यत्र तं तथा । किं [4]कुर्वती ? अनन्तान् तेजःसखा[न्] निखिलान् मरुतो देवान् पार्थिवांश्च तान् [सर्वान्] [5]आप्य मुञ्चती । किंभूतान् ? दिष्टभाजो दैवपरान् । किंभूतान् ? चित्ते[न] आशाजुषः । कथम् ? समं [तथा] असमा निरुपमा गुणाः शौर्यादयो येषां तान् तथा । किंभूता ? गूढो भावोऽभिप्रायो यस्याः सा तथा । उपनिषदपि एक[म]द्वितीयं पुरुषं परमात्मानं ब्रह्मा-/म

---

1 I तद्वर्ण । 2 I, I2 om. इति 3 I ०विभ्यो व 4 I2 om. असौ 5 I. vdd. असौ; I2 om. इव 6 I2 om. इव .... पाठान्तरम् 7 I2 मम्ले 8 I, I2 जगाम 9 I2 om. मम्ले ... व्याचक्षते 10 B मम्लाविति ॥ I, 136. ॥१२६॥ 1 I सानं । 2 B I किंभूते 3 B भूता म I2 कुर्वत 5 B प्राप्य

मुक्तीकृत्य तत्परा[6] भवति। किंभूतम्?। पारे विकवर्तिरूपं नीरूपम्। अथवा यतो वाचो निवर्तन्ते अप्राप्य मनसा सह (तै.उ. II.iv.) इति[7] श्रुतेः [सु]तीतवाग्विषयम्। तथा चिदम्भोधिं चैतन्यघनम्। किंभूतम्?।[8] निःसीम भूमानम्। किंभूतम्?। आनन्दं सुखस्वरूपम्। किंभूतम्?। भूयः समस्तेभ्यो भूयांसं पुरुषमथवा। किं कुर्वती?। [भूयो भूयस्त्वात्तत्परीभूय ब्रह्मपरीभूय[9] आप्य तेजःसखान् निखिलमरुत्पार्थिवान् मुञ्चती]। उदकान् तेजसा[नि] सह खेन आकाशेन वर्तन्ते[10] ये भावास्तान्निखिलान् मरुतः[11] वायव्यान् पार्थिवांश्च पृथिवीसम्बन्धिनो भावान् निरस्यन्ती। किंभूतान्?। सानन्तान् नाम संयुक्तान्। अनन्तं वै नाम (बृ. III.i.12) इति श्रुतेः। किंभूतान्?। दिष्टभाजः। दिष्टशब्देन वागुच्यते। दिश्यते उपदिश्यते असाविति कृत्वा तां भजन्ते, ये[12] स्तांस्तथा। केन समम्?। चित्तेन समम्। चित्तशब्देन मनः सङ्कल्पः चैतन्यं ध्यानं विज्ञानं स्मरणं चोच्यते। किंभूतान्?। आशाजुषः। आशाशब्देन आशंसोच्यते। किंभूतान्?। [असमगुणान्[13]]। पृथ्वी शब्दादिपञ्चगुणा। आपश्चतुर्गुणास्तेजस्त्रिगुणं वायुर्द्विगुणम् आकाशस्यैक एव गुणः[14] शब्दः। असमगुणान्[15] [च[16]] मुञ्चती। नामप्रभृतीनाम् आशापर्यन्तान् भावान् भ्रान्त्या ब्रह्मभावेन मत्वा मत्वा[17] मुञ्चती। यतो गूढो भावो परमार्थो यस्याः सा तथा।[17] पुनः किं[भू]ता?। शुभाङ्गा। शुभान्यङ्गानि शिक्षादीनि षट्। अथवा चत्वारि शमदमउपरतितितिक्षाख्यानि साधनानि यस्याः सा तथा। तथा च सामोपनिषदि सप्तमप्रपाठके – अधीहि भगव इति होपससाद (6.2 a) द सनत्कुमारं नारदः तं सनत्कुमार उवाच। यत्त्वं वेत्थ तत्कथय। ततस्ते ऊर्ध्वं वक्ष्यामि।

---

6 I2 तरी 7 I1 श्रुतीति वाग्विषयम् 8 I1 I2 निःसीम° 9 I2 om. ब्रह्मपरीभूय 10 B I2 वर्त्तते 11 B I1 मरुत 12 I2 येषां तां 13 I1 सम° 14 I2 शब्दो गुणः 15 B I1 I2 आशा; var. असम° 16 I1 om. च 17 I1 om. मत्वा

सर्ग ११ 69

ततो नारद उवाच - ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदम् आथर्वणं[19]
चतुर्थमित्यादि सर्वां विद्यामध्येमि। पारं मन्त्रविदेवाऽस्मि, नात्मवित्। श्रुतं
मया तरति[20] शोकमात्मवित् इति[21], ततो मां भगवान् शोकस्य पारं तारयतु[22]।
तमुवाच सनत्कुमारो - यद्वै किञ्चैतदध्यगीष्ठ नामैवैतत् ॥ नाम वा
ऋग्वेदो यजुर्वेद इत्यादिरूपो[23]। [24]नाम ब्रह्मेत्युपास्ते, स नाम गतं सर्वं विजा-
नाति न तु परं प्राप्नोति। [25]अथ नारद आह - अस्ति नाम्नो भूयः किञ्चित्।
आह सनत्कुमारः - वाग्वाव नाम्नो भूयसी, वाग्वै ऋग्वेदादिकं सर्वं,
सर्वं नाम विज्ञापयति यो वाचं[26] ब्रह्मेत्युपास्ते स वाचो[27] सर्वं विजा-
नाति। अस्ति किञ्चिद्वाचो भूयः? मनो वाव[28] वाचो भूयः। [29]यदा हि
मनस्यति तदा वाचा नाम वदति। यो मनो ब्रह्मेत्युपास्ते, स मनसो गतं
सर्वं[30] विजानाति। अस्ति किञ्चिद् भगवो भूयो यदा हि मनस्यति, तदा
वाचा नाम वदति। यो मनो ब्रह्मेत्युपास्ते, स मनोगतं सर्वं वेद, न तु
परं प्राप्नोति। सङ्कल्पो वाङ्मनसो भूय[31] [इति]। यदा सङ्कल्पयतेऽथ
मनस्यति। चित्तं वाव[32] सङ्कल्पाद् भूयो, यदा चैतन्येन चेतयतेऽथ सङ्क-
ल्पयते। ध्यानं वाव चित्तात् भूयो, विज्ञानं वाव ध्यानाद्भूयो, विज्ञानेन
वा ऋग्वेदं विजानाति। बलं वाव विज्ञानाद्भूयो, विज्ञानवतां शतमप्येको
बलवानाकम्पते[33]। बलशब्देन वायुरुपलक्ष्यते। अन्नं वाव बलाद्भूयो,
यदि दश रात्रीर्नाश्नीयात्ततोऽद्रष्टा अश्रोता अमन्ता भवति। अन्नादेव
बलम्। अन्नशब्देन पृथिव्युपलक्ष्यते। आपो वाव अन्नाद्भूयः[34], यदि

19 B अथर्वणं 20 B चरति 21 P1 °वदिति 22 B तरेयतु 23 P2 °मयो
24 B न मे 25 P2 om. अथ ... किञ्चित् 26 P2 वादं 27 P2 वाचोगतं 28
P2 वाच 29 P2 om. यदा हि ... मनसो भूय[इति] 30 P1 om. विजानाति ...
मनोगतं सर्वं 31 B भूयते 32 P1 वाचा henceforth in place of वाव 33 P2 °कम्पयति
34 P1 भूयस्थ; P2 भूयस्य पिपा

सुवृष्टिर्भवति तदाऽन्नं बहु। तेजो वाव[वि] अद्भ्यो भूयोऽभितापेन वैद्युत तेजो दर्शयित्वाऽथ आपः सृजते। आकाशो वाव[वि] [35]अद्भ्यो[स्] तेजसो भूयान्। आकाशो वै सूर्याचन्द्रमसौ। स्मरो वा आकाशाद्भूयः। [36]यदा न स्मरति तदा किमपि न जानाति। आशा [वा]व स्मराद्भूयसी, यदा [37]आशंसया इदं स्मरणं भवति तदा मन्त्रान[अ]धीते कर्म कुरुते। प्राणो वाव [38]आशाया भूयान्। यथा वा अरा नाभौ समर्पिता, एवं प्राणे [39]समर्पितं स एव भूमा यो वै भूमा तत्सुखं[सो] [40]आनन्दः स एव विजिज्ञासितव्यः। यत्र नान्यत्पश्यति नान्यत् शृणोति नान्यद्वि[41]जानाति स भूमा (छा० VII. i–xxiv.1)। इत्थमियमुपनिषन्[42]नामाद्युपक्रम्य [यद्]यद्भूय तत्तदाशापर्यन्तं परि[43]त्यजन्ती स्वमहिमरूपे प्राणे भूम्नि सर्वस्याऽस्य प्रतिष्ठामाह। द्विवचनविभज्योपपदे तरबीयसुनौ इति (पा० V. iii. 57) इति द्वयोर्मध्यात्, यद्बहु तद्भूय[44] बहोर्भावो भूम्नि बहुशब्दादीयसप्रत्यये भूरादेशः। [45]पृथ्वादिभ्य इमनिज्वा (पा० V. i. 122) इतीमन्। भूमा इति निपातः। [46]स्रग्धरा [47]वृत्तम् ॥१२७॥

---

1 श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
शृङ्गारामृतशीतगावयमगादेकादशस्तन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥ इति

---

35 B P1 अथ; P2 om. अद्भ्य° 36 P1 सदा 37 P2 आकाशंसया 38 B आकाशाया; P2 आशाधान 39 P2 add. सर्वं 40 P2 om. स 41 B P1 जानाति 42 B P1 P2 °न्नामा°; edr. °न्नामा°; P2 om. °पक्रम्य ... °विभज्यो° 43 B °त्यजन्ताम्; P1 P2 °त्यजन्ति 44 P2 om. बहोर्भावो; and add. यद्बहु स भूमा 45 P2 om. वा 46 P2 om. स्रग्धरा वृत्तम् 47 P1 137.

1 P2 + exp. श्रीहर्षमिति and om. AB. 2 P2 add. राजकवर्णनं नाम एकादशः सर्गः।

शुभं भवतु। श्रीः।

सर्ग ११ 71

3 श्रीहर्षम् [इति] । तस्य कवेर्महाकाव्ये । किंभूते ? शृङ्गारामृतशीतगौ चन्द्रे एकादशः सर्गोऽगात् । [4] शार्दूलविक्रीडितं वृत्तम् ॥१२८॥

---

1 [श्रीमानाल्लिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम-
श्चाण्डुपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम् ।
काव्ये नैषधसंज्ञिते क्रमवशात्संवत्सरे यज्वना
अ(?)ग्निष्टोममखेन तेन विवृतिः सर्गे कृतैकादशे ॥१३०॥

---

किमपि मुकुटरत्नं नागरश्रोत्रियाणां
प्रतिनिधिरिव तेजःसद्मनः पद्मयोनेः ।
विधुरुपशमसिन्धोराल्लिगो नाम धीमा-
निह समजनि पत्नी गौरिदेवीति चास्य ॥१॥

---

यौ श्रामधर्म(?)लयनिर्मलचित्तवृत्तिः
श्रद्धान्वितः सा(?)वपतिः(?) प्रतिपात्रमर्थम् । (?)
तस्याऽन्वयेन विनयेन धनोदयेन
कोऽप्याल्लिगस्य न पुमानुपमानमत्र ॥२॥

---

तदात्मजस्ताल्हणनामधेयो विशारदः शारदचन्द्रकीर्तिः ।
महाक्रतौ ज्योतिषि कर्मकाण्डे क्रमाच्चतुःसंस्थतया प्रयोक्ता ॥३॥

---

3 P. श्रीहर्षम् । M P2 om. शार्दूलविक्रीडितं वृत्तम् ॥१२८॥
1 P. om. श्रीमानाल्लिग------ स्म टीकाम् ॥५॥

समाहस्थपत्यगिनाचिदग्रजन्मा –
गणपच्चाण्डूविदुषोऽनुजन्मा ।
त्रैविद्यवृद्धार्चितसर्वदेव –
बुधाग्रजन्मा महनीयजन्मा ॥१॥

श्रीवैद्यनाथाभिधसक्तदेवी –
पदप्रसादोपचितप्रसादैः ।
पदैरुदाराकृतिभिः प्रक्लृप्तां
क्वचित्क्वचित् शोधयति स्म टीकाम् ॥२॥

इति [1]धवलकवास्तव्य-दीक्षित-महापण्डित-
श्रीचा[2]ण्डूविरचितायां नैषधदीपिकायां (162)
[टीकायाम्] एका[3]दशः सर्गः
समाप्तः[4]॥

1 P2 om. धवलक .... विरचितायां 2 B °चान्डू° 3 P1 °दशमः
4 P1 add. ॥छ॥श्रीः॥७५०॥ग्रन्थ–॥; P2 add. ॐ नमः शिवाय॥
संवत् १५९८ मिते श्रावणसुदि २ रवौ लिखितम् .....॥श्रीरस्तु॥
शुभं भवतु ॥ कल्याणमस्तु॥ लेखकपाठकयोस्तथा चान्येषां
शुभं भूयादिति भद्रम्॥